TRIVANDRUM SANSKRIT SERIES.

No. LXXXIX.

Śrî Setu Laksmî Prasâdamâlâ

No. I.

THE SPHOṬASIDDHI

OF

BHARATAMIŚRA

EDITED BY

K. SÂMBASIVA SÂSTRÎ

Curator of the Department for the Publication of Sanskrit Manuscripts, Trivandrum.

PUBLISHED UNDER THE AUTHORITY OF THE GOVERNMENT OF HER HIGHNESS THE MAHARANI REGENT OF TRAVANCORE.

TRIVANDRUM:
PRINTED BY THE SUPERINTENDENT, GOVERNMENT PRESS,
1927.

अनन्तशयनसंस्कृतग्रन्थावलिः ।

ग्रन्थाङ्कः ८९.

श्रीसेतुलक्ष्मीप्रसादमाला
ग्रन्थाङ्कः १.

स्फोटसिद्धिः

भरतमिश्रप्रणीता

संस्कृतग्रन्थप्रकाशनकार्याध्यक्षेण
के. साम्बशिवशास्त्रिणा
संशोधिता ।

सा च
अनन्तशयने
महामहिमश्रीसेतुलक्ष्मीमहाराज्ञीशासनेन
राजकीयमुद्रणयन्त्रालये तदध्यक्षेण
मुद्रयित्वा प्रकाशिता ।

कोल्लम्वाब्दाः ११०२, क्रैस्ताब्दाः १९२७.

PREFACE.

The present work Sphoṭasiddhi treats of the Sphoṭa-doctrine of Vaiyākaraṇas establishing the eternal word-principle transcending letters or sounds, within the short compass of three Paricchedas, viz., Pratyakṣa, Arthāpatti and Āgama, as the following extracts show.,

1. 'तदित्थं गौरित्युच्चारणे सत्येकत्वनानात्वप्रत्ययान्यथासिद्धिनिरसनसमर्थ-नाभ्यां प्रत्यक्षेण वर्णातिरिक्तं पदं व्यवस्थापितम् ।' (p. 16).

2. 'एवमर्थप्रतिपत्त्यन्यथानुपपत्त्या वर्णातिरिक्तं वाक्तत्त्वमुपदर्शितम् ।' (p. 27).

3. "अतः 'इतो त्वस्मै तन्वं विसस्र' इति मन्त्रवर्णः 'स एतं मन्त्रमपश्यत्' 'ब्रह्म स्वयम्भ्वभ्यानर्षदि'त्यादिकश्च ब्राह्मणवर्णो वर्णातिरिक्तशब्दतत्त्वदर्शनमात्मदर्शन-मुपदिशतीत्यागमसिद्धमप्यनंशं वाक्तत्त्वम्" (p. 36).

The object of the work is to prove the identity of the universe with the eternal sound called sphoṭa transcending letters which is maintained in the Śabdādvaitaprakaraṇa. This is evident from,

"एवं प्रत्यक्षादिमानत्रयसिद्धे शब्दस्य वर्णातिरिक्तत्वे तन्मयत्वं विश्वस्य शब्दा-द्वैतप्रकरणे बहुभिर्हेतुभिः समर्थ्यत इति तदेव वास्य प्रकरणस्य प्रयोजनम् ।" (p. 37).

The Sphoṭa-doctrine enunciated by Audumbarāyaṇa and other ancient grammarians is in this work further established, with authorities arranged in convincing fashion and in a style lucid and dignified; so, indeed Sphoṭasiddhi may be said to be a significant title of the work.

The colophons at the end of the chapters,

"इत्याचार्यभरतमिश्रकृतौ स्फोटसिद्धौ प्रत्यक्षपरिच्छेदः समाप्तः । °अर्था-पत्तिपरिच्छेदः समाप्तः । °आगमपरिच्छेदः समाप्तः ।"

show that Ācārya Bharatamiśra was the author of the work. It has not been possible to learn anything particular regarding the author. That he was earlier than the author of the Sphoṭasiddhinyāyavicāra published as No. 54 of the Trivandrum Sanskrit Series is certain from the invocatory verse of the latter,

"प्रणिपत्य गणाधीशं गिरां देवीं गुरूनपि ।
मण्डनं भरतं चापि मुनित्रयमसुं हरिम् ॥"

That there are many works besides the present one on the subject is shown in Appendix B.

We will here consider this Sphoṭa briefly. Most grammarians maintain that Sphoṭa is the word-principle transcending letters (*i. e.*, sounds). This is briefly how they arrive at their doctrine. "In Gauh etc. the letters g, au, visarga etc., are no sooner produced than they cease to be; they are several; they cannot be coeval; they cannot make up an entity beyond their own individual selves; they are not competent to convey sense each by itself: hence is this Sphoṭa accepted by all as the eternal word-principle shining in the heart. It only manifests itself to us when expression is desired as the sound which has received the impress of the positions and efforts (ordinarily employed in sound production); the series of such sounds has its meaning fixed by the sense of the last sound, the same being embellished by the reminiscence of the effect of experiencing each preceding sound in retrograde order".

This very idea is conveyed by some other Ācāryas in different terms: the word-principle is conceived as having four stages—Parā, Paśyantī, Madhyamā and Vaikharī; the first is beyond comprehension; the second is attainable only by yogins; the third Madhyamā is the sūksma sound to be grasped by the intellect and audible only to one's own innate powers of hearing; the fourth is the word as we have it in use. Now, it is the third among these that is accepted as the Sphoṭa above enunciated.

Certain other Ācāryas hold that it is the letter or letters of a word that conveys the meaning and that there is nothing in a word except the letters composing it. The great Śankarācārya refers* in respectful terms to Upavarsācārya as an opponent of the Sphoṭa-doctrine and Śabarasvāmin also cites† the authority in a similar context.

We shall now consider when and by whom the Sphoṭa-doctorine was promulgated. There is no reference to the doctrine in the sūtras of Pāṇini, and also in the vārtikas of Kātyāyana; and from this it may be inferred that the doctrine was not well known during the time of the two

---

* "वर्णा एव तु शब्दः, इति भगवानुपवर्षः,"
(Devatādhikaraṇa in the Sūtrabhāsya).

† "अथ गौरित्यत्र कः शब्दः? । गकारौकारविसर्जनीया इति भगवानुपवर्षः . . . . . पूर्वपूर्ववर्णजनितसंस्कारजनितोन्त्यो वर्णः प्रत्यायक इत्यदोषः" । इति।
(Mīmāmsā bhāsya 1. 1. 5.)

grammarians. But from the statement in the Mahābhāṣya,

'येनोच्चारितेन सास्नालाङ्गूलककुदखुरविषाणिनां सम्प्रत्ययो भवति स शब्दः'

'एवं तर्हि स्फोटः शब्दः । ध्वनिः शब्दगुणः'

it is plain that the doctrine was prevalent at the time of Patañjali. But I am of opinion that Pāṇini knew Sphoṭa as he quotes a predecessor of his, named Sphoṭāyana.* Haradatta, in his commentary on Kāśikā comments on the name and attributes it to an Ācārya devoted to the Sphoṭa-doctrine.† Thus it would appear that the Sphoṭa-doctrine was earlier than Pāṇini himself.

From the mention of the word Sphoṭa as referring to the doctrine in the Śrīmad-Bhāgavata,‡ it is certain that it was current in the Puranic period.

The edition of the work is based on a single palm leaf manuscript about two or three centuries old belonging to Pantaḷam Raja, and no other manuscript was available. However, considering the rare merit of the work it is now published in the Trivandrum Sanskrit Series.

K. SĀMBASIVA SĀSTRĪ.

---

* 'अवद् स्फोटायनस्य' (6-1-123).

† "स्फोटोऽयनं परायणं यस्य स स्फोटायनः स्फोटप्रतिपादनपरो वैयाकरणाचार्यः।"

‡ "दिशां त्वमवकाशोऽसि दिशः खं स्फोट आश्रयः ।
नादो वर्णस्त्वमोङ्कार आकृतीनां पृथक्कृतिः ॥" (Skandha 9. Cha. 85).

उपोद्घातः ।

ग्रन्थोऽयं स्फोटसिद्धिर्नाम प्रत्यक्षार्थापत्त्यागमैस्त्रिभिः परिच्छेदैर्वैयाकरणाभिमतं वर्णातिरिक्तमखण्डं पदतत्त्वं व्यवस्थापयति । तथा-चोक्तं —

१. 'तदित्थं गौरित्युच्चारणे सत्येकत्वनानात्वप्रत्ययान्यथासिद्धिनिरसनसमर्थनाभ्यां प्रत्यक्षेण वर्णातिरिक्तं पदं व्यवस्थापितम् ।' (पृष्ठम् १६)
इति,

२. 'एवमर्थप्रतिपत्त्यन्यथानुपपत्त्या वर्णातिरिक्तं वाक्तत्त्वमुपदर्शितम् ।' (पृष्ठम् २७)
इति,

३. "अतः 'उतो त्वस्मै तन्वं विसस्रे' इति मन्त्रवर्णः 'स एतं मन्त्रमपश्यत्' 'ब्रह्म स्वयम्भ्वभ्यानर्षदि'त्यादिकश्च ब्राह्मणवर्णो वर्णातिरिक्तशब्दतत्त्वदर्शनमात्मदर्शनमुपदिशतीत्यागमसिद्धमप्यनंशं वाक्तत्त्वम् ।" (पृष्ठम् ३६)
इति च ।

प्रयोजनमस्य निबन्धनस्य शब्दाद्वैतप्रकरणे विश्वस्य वर्णातिरिक्तशब्दमयत्वं समर्थ्यत इति तदेवाभिसंहेतम् । आह च —

"एवं प्रत्यक्षादिमानत्रयसिद्धे शब्दस्य वर्णातिरिक्तत्वे तन्मयत्वं विश्वस्य शब्दाद्वैतप्रकरणे बहुभिर्हेतुभिः समर्थ्यत इति तदेव वास्य प्रकरणस्य प्रयोजनम् ।" (पृष्ठम् ३७)
इति ।

प्रौढाभिरुपपत्तिसहाभिः प्रमाणपद्धतिभिः, विवक्षितार्थप्रतिपादनप्रवणया चोज्ज्वलया शैल्या भगवदौदुम्बरायणादिशाब्दिकाचार्योपदिष्टं स्फोटं साधयन्नयं मन्ये यथार्थमेव स्फोटसिद्धिः ।

एतद्ग्रन्थप्रणेता आचार्यश्रीभरतमिश्र इत्यादर्शगतात् तत्तत्परिच्छेदसमाप्तिवाक्याज् ज्ञायते । यथा —

"इत्याचार्यभरतमिश्रकृतौ स्फोटसिद्धौ प्रत्यक्षपरिच्छेदः समाप्तः — अर्थापत्तिपरिच्छेदः समाप्तः — आगमपरिच्छेदः समाप्तः ।" इति ।

अस्याभिजनो देशः समयो वा यथावद् न ज्ञातः । इतः पूर्वमस्मत्कार्यालयप्रकाशितस्फोटसिद्धिन्यायविचारग्रन्थदृष्टात् प्रथमपद्यात् तु प्रस्तुतोऽयमाचार्यभरतमिश्रस्ततः प्राचीन इत्यवगम्यते । यथा —

"प्रणिपत्य गणाधीशं गिरां देवीं गुरूनपि ।
मण्डनं भरतं चापि मुनित्रयममुं हरिम् ॥"

इति ।

अन्येऽपि जाग्रत्यनेके स्फोटविषया ग्रन्था इत्यनुक्रमण्यां कापि पट्टिका प्रदर्शयेत् ।

एतादृशं स्फोटं प्रति किञ्चिदिह विमर्शनीयं पश्यामि — स्फोटोऽयं वैयाकरणेषु भूयोभिरभ्युपगम्यमानं वर्णातिरिक्तं किमपि शब्दतत्त्वं नाम । अयमेष तेषामत्र विषये सैद्धान्तिकः प्रक्रियामार्गः "गौरित्यादौ गकारौकारविसर्जनीयादीनां वर्णानाम् उच्चारितप्रध्वंसिनामनेकत्वेन, सहावस्थानविरहेण, स्वातिरिक्तसमुदायाभावेन, अखण्डैकार्थप्रत्ययजननशक्तिशून्यतया च क्रमवत्पूर्वपूर्ववर्णानुभवजनितसंस्कारस्मृत्युपस्कृतान्त्यबुद्धिनिर्ग्राह्यस्तत्तत्स्थानकरणसंयोगविभागोट्टङ्कितनादाभिव्यङ्ग्यो हृद्यवभासमानो नित्यः कोऽप्यर्थस्फोटनसमर्थः शब्दतत्त्वात्मा स्फोटः सर्वानपह्नवनीय" इति । अयमेव चार्थो भङ्ग्यन्तरेण संपिण्डितस्तत्त्वविद्भिरन्यथापि निरूप्यते । यः परापश्यन्तीमध्यमावैखरीसंज्ञानां चतसृणां वाचां मध्ये स्वकीयश्रोत्रमात्रग्रहणयोग्या या सूक्ष्मा जपादौ बुद्धिनिर्ग्राह्या मध्यमा सा निरुक्तस्फोटरूपेति । सत्यामप्येवं वस्तुस्थितौ तेष्वेव कतिपये प्रतिवर्णमर्थवत्तामभ्युपयन्त आचार्या वर्णानेव शब्दमातिष्ठमाना न न सन्तीत्यपि नातिगूढं विचारकाणाम् । यदाहुः सूत्रभाष्ये शाङ्करभगवत्पादाः — "वर्णा एव तु शब्द इति भगवानुपवर्षः", इति (देवताधिकरणे Page 255) यच्च वर्णयन्ति मीमांसादर्शनभाष्ये श्रीशबरस्वामिनः — "अथ गौरित्यत्र कः शब्दः ? । गकारौकारविसर्जनीया इति भगवानुपवर्षः ....पूर्वपूर्ववर्णजनितसंस्कारसहितोऽन्त्यो वर्णः प्रत्यायक इत्यदोषः", इति । (प्रथमाध्यायप्रथमपादे Page 10)

२. अथायं स्फोटः कस्मिन् वा काले कैर्वा शाब्दिकाचार्यैरवतारितः प्रतिष्ठामलभतेति विचार्यते — सूत्रकारस्य भगवतः **पाणिनेराचार्यस्य**, वार्त्तिककारस्य वा **कात्यायनमहर्षेर्निबन्धेषु** न क्वचिदुपलब्धात्मा ताभ्यामनुक्त्या तदसम्मतोऽयमित्यापतति । भाष्यकारस्तु भगवान् **पतञ्जलिराचार्यः** पस्पशायां — 'येनोच्चारितेन सास्नालाङ्गूलककुदखुरविषाणिनां सम्प्रत्ययो भवति स शब्दः' इति स्फोटात्मानं शब्दं निर्ब्रुवंस्तदिदमिङ्गितं नवम आह्निके तपरसूत्रव्याख्यावसरे स्पष्टयन् 'एवं तर्हि स्फोटः शब्दः । ध्वनिः शब्दगुणः' इति स्फोटं नामतोऽग्रहीदिति तदायं सुप्रतिष्ठित इति ज्ञायते । परं तु 'अवङ् स्फोटायनस्य' (६. १. १२३) इति **स्फोटायनमाचार्यं** स्मरता सूत्रकारेण मन्ये ततोऽपि बहोः कालात् प्रागेव स्फोटोऽयं शाब्दिकसिद्धान्तकोटौ गणितः सुदूरं प्रचचारेत्यभ्युपेतकल्पम् । एतत्सूत्रव्याख्यावसरे हि **काशिकाव्याख्याता हरदत्ताचार्य** एवमाह — "स्फोटोऽयनं परायणं यस्य स स्फोटायनः स्फोटप्रतिपादनपरो वैयाकरणाचार्यः" इति । किं बहुना पौराणिककालेऽपि कृतसञ्चारोऽयं स्फोटः पुराणतामात्मनोऽभिव्यङ्क्तुमलम् । तथाच भागवते दशमस्कन्धे ८५ तमाध्याये नवमश्लोके,


"दिशां त्वमवकाशोऽसि दिशः खं स्फोट आश्रयः ।
नादो वर्णस्त्वमोङ्कार आकृतीनां पृथक्कृतिः ॥"

इति ।

ग्रन्थोऽयं **पन्तलसजसम्बन्धिनं** केरलीयलिपिं द्वित्रशतवर्षवृद्धं तालपत्रात्मकमेकमादर्शमाश्रित्य संशोधितः । उपादेयतामाहेम्ना विषयप्रौढिम्ना चायमादर्शान्तरविरहेऽप्यवश्यप्रकाश्यो गणितः ।

अनन्तशयनम्,
१७-३-१०२.

के. साम्बशिवशास्त्री.



श्रीपद्मनाभसेवि-
न्यखिलश्रीवर्धनी महाराज्ञी ।
श्रीसेतुलक्ष्म्यभिख्या
प्रत्यक्षा जयति वश्चिभूलक्ष्मीः ॥

ग्रन्थावलिरियमिन्धे
प्रसाधिता तत्प्रसादगुणगुम्फा ।
श्रीसहितसेतुलक्ष्मी-
प्रसादमाला सुवर्णमणिचित्रा ॥

॥ श्रीः ॥

भरतमिश्रप्रणीता

स्फोटसिद्धिः ।

प्रत्यक्षपरिच्छेदः ।

..... जयत्यशेषप्रकाश्यतत्पूर्व ..... ।
.... कुर्वन्निरवयवं चित्रशक्तिपदम् ॥

एकाकारधिया तावद् वर्णेभ्योऽभ्यधिकं पदम् ।
शङ्कनीयान्यथासिद्धिनिरासेन समर्थ्यते ॥

इह कैश्चिद् वर्णातिरिक्ततया पदतत्त्वमेकाकारप्रत्ययनिर्भासमानमप्यनन्तरदृष्टार्थहेतुतया च 'तदागमे हि दृश्यत' इत्यनेन न्यायेन प्रसिद्धमपि भगवदौदुम्बरायणाद्युपदिष्टाखण्डभावमपि व्यञ्जकारोपितनान्तरीयकभेदक्रमविच्छेदाभिनिविष्टैः पैररेकाकारनिर्भासमन्यथासिद्धीकृत्यार्थधीहेतुतां चान्यत्र सञ्चार्य भगवदौदुम्बरायणादीनपि भगवदुपवर्षादिभिर्निमायापलपितमिति तत् समर्थनमपेक्षते । तच्चास्य समर्थनं वाक्यपदीयादिषु विप्रकीर्णमिति समासेन प्रतिपादनमाकाङ्क्षति । अतोऽस्मिन् प्रकरणे श्लोकदशकमात्रसूत्रितसमर्थनैः प्रत्यक्षार्थापत्त्यागमैर्वर्णातिरिक्तं पदतत्त्वं व्यवस्थाप्यते । तत्र प्रत्यक्षं तावत् प्रसिद्धमेव, गौरित्युच्चारणे सत्येकमेवेदं पदमित्येका-

कारविज्ञानोदयात् । नचेदं वर्णमात्रविषयं भवितुमर्हति, तेषां भिन्नानामभ्रान्तैकाकारज्ञानविषयत्वायोगात् । नचेदं भ्रान्तं, भ्रान्तिनिमित्ताभावात् ।

नन्वेकधीस्था वर्णास्तद्धर्माध्यासादेकमिदं पदमित्यभेदेन भान्ति । यथैकभूस्था वृक्षा वनमिति । तथाहि — पूर्ववर्णानुभवजसंस्कारसहितचरमवर्णसम्प्रयोगेण स्मृतिप्रत्यक्षरूपा सर्वसंस्कारैर्वा क्रमजन्यत्वेऽपि स्थायितयान्वय(बोधासि)द्धौ स्मृत्येकरूपा सकलवर्णग्राहिण्येका धीर्जन्या तात्स्थ्याद् वर्णानामैक(पद्यं) करिष्यति । तन्न । चित्ररूपायां बुद्धौ उपान्त्यवर्णारोहासम्भवात्, स्मृत्येकरूपायामपि क्रमरोधात् कपिपिकयोरैकपद्यापत्तेः । तथाहि — उपान्त्यसम्प्रयोगानन्तरमन्त्यसम्प्रयोगोपान्त्यानुभवौ, तदनन्तरं चान्त्यानुभवोपान्त्यसंस्काराविति तदुत्तरकालमुपान्त्यः स्मर्तव्यः । स न चित्रायामारोहेत् । स्मृत्येकरूपायामपि यदि सैव क्रमवद्वर्णाकारा तदाकारा एव वा पदमित्याश्रीयते । यदि क्रमवद्वर्णाकारा, तस्याः स्वात्मनि भेदाभावस्य सुव्यक्तत्वात् तदाकाराणामप्येकबुद्ध्यव्यतिरेककराणां परस्परतोऽप्यभेदादखण्डमेवेदं पदं स्यादिति वैयाकरणानामेवेदमन्ततस्तत्त्वदर्शनमापद्येत । अथैकधीस्था अपि वर्णाः परस्परतो बुद्धितश्च व्यावृत्ता एवेति वैयाकरणदर्शनाद् विवेकः, तदापि क्रमव्यतिरिक्तस्य भेदहेतोरभावात् क्रमस्य च रोधात् कपिपिकयोरैकपद्यमापद्यते । तथाहि—धीश्च तत्स्था वा वर्णाः कार्यत्वे प्रत्युच्चारणं भिन्नाः इति पदभेदे समर्थ्यमाने कपिः कपिरित्यत्रापि प्रसज्येत ।

कत्वादिजातयः ककारकार्यत्वे सत्युच्चारणभेदेऽप्यनुगता इति कपिः कपिरित्यत्र पदाभेदे सम्भाव्यमाने कपिपिकयोरपि तदापत्तिः । नचेह प्रतिपदोपक्षयामवान्तरजातिमाश्रित्य पदभेदः समर्थनीयः, तस्या अप्यनेकव्यक्त्यभिव्यङ्ग्याया एकस्या आश्रयणे जातिस्फोटदर्शनाभ्युपगमप्रसङ्गात् । प्रतिवर्णं तु भिन्नायाः कैश्चिदप्यनाश्रयणादप्रतीयमानत्वादनुपपत्तिक्षयाच्च । नापि नित्या अपि वर्णव्यक्तीः प्रतिपदोपक्षयाः समाश्रित्य पदभेदः समर्थनीयः, अस्यापि दर्शनस्य वैयाकरणैरेव कैश्चित् प्रतिवर्णमर्थवत्तां ब्रुवाणैराश्रितत्वाद्, अप्रतीत्यनुपपत्तिक्षययोश्च तादवस्थ्यात् । तस्मात् कपिपिकयोः क्रमव्यतिरिक्तो भेदहेतुर्नास्ति । अस्तु तर्हि क्रम एव भेदकः । तदपि न । क्रमस्य सर्वत्रैवानवक्लृप्तेः, वर्णतद्धीषु तु विशेषतोऽप्यनुपपत्तेः । तथाहि — क्रमोऽयं स्वतन्त्रस्तावन्न भवति, तथा प्रतीत्यभावात् । परतन्त्रोऽपि सन् कालस्य वा स्यात् तद्वतां वा । त(त्र) न तावत् कालस्यैकत्वे स्वतः क्रमः, नाप्यौपाधिकः, उपाधीनामक्रमाणामनुपाधित्वात्, सक्रमाणामपि स्वतः सक्रमत्वे कालकल्पनावैयर्थ्यात् । कालात्तु सक्रमत्वे सतीतरेतराश्रयत्वात् । अनेकत्वेऽपि कालस्य तद्भेदानां च नित्यत्वाभ्युपगमे सत्यक्रमत्वमृतुलिङ्गसङ्करश्च । अनित्यत्वाभ्युपगमे च तत्क्रमोऽपि कालान्तराधीनश्चेदनवस्था, स्वाभाविकश्चेत् पदा(र्था?)नामेव तत्स्वभावतास्तु किं कालकल्पनया तत्क्रमकल्पनया च । अतो न कालस्य क्रमः, नापि तद्वत्तयाभिमतानां, नित्यत्वे क्रमासम्भवाद्, अनित्य-

त्वेऽपि विद्यमानानां परस्परापेक्षया क्रमविरोधियौगपद्यदर्शनात्। अतीतानागतापेक्षस्यापि क्रमस्यापेक्ष्यमाणा(नाम)भावेनानुपपत्तेः। अतः क्रमस्य सर्वत्रैवानवक्लृप्तिः। अन्यत्रावक्लृप्तावपि वर्णतद्धीषु पदभेदहेतुत्वेनाभिमतस्यानुपपत्तिरेव। तथाहि — वर्णानां तज्जातीनां च क्रमो नास्ति, नित्यत्वात्। अनित्यत्वे तु वर्णानां सम्भवन्नपि क्रमो न पदभेदहेतुः। प्रत्युच्चारणमपि भिन्नत्वेन कपिः कपिरित्यत्रापि पदभेदप्रसङ्गात्। नित्यत्वेऽपि वर्णानां बुद्ध्युपाधिकः क्रमः स्यादिति चेत्। सोऽपि क(मिकः? मः) पूर्वबुद्ध्युपाधिकः सन्नुपाधिरोधेन रुद्धत्वान्नैकधीस्थान् वर्णान् विशेष्टुमीष्टे। एका तु धीरैक्यादेव स्वयमेव क्रममलभमाना स्वगतेषु वर्णेषु क्रमं नोपाधत्ते।

ननु पूर्वबुद्ध्युपाधिकः क्रमो रुद्धोऽपि वर्णस्वरूपवत् स्मर्यमाणः सन्नेकधीस्थान् वर्णान् विशेक्ष्यति। तदपि न। अननुभूतस्य स्मर्तुमयोग्यत्वात्। अनुभवैश्च स्वप्रकाशत्वे स्वोपाधिकधर्मोपग्रहक्षमैरपि स्वात्ममात्रावच्छिन्नैकैकवर्णोपक्षयतया वर्णान्तरानुभववार्तानभिज्ञैस्तदपेक्षस्य क्रमस्यानुभवितुमयोगात्। एकधीरेवेयमनुभूतेषु वर्णेषु स्मृतिरूपापि तत्क्रमांशेऽनुभवरूपेति चेन्न। अतीतया लिङ्गादिरहितया च तस्य प्रत्यक्षरूपयानुमानादिरूपया वानयानुभवायोगात्, त्रिप्रभृतिषु वाजपे(क्ष)योक्तवैरूप्यप्रसङ्गाच्च। नहीत इदमितोऽपीदमिति पूर्वापेक्षया प्राधान्यमुत्तरापेक्षया च गुणत्वमेकस्य पूर्ववदेकधियानुभवितुं शक्यम्।

अपिचायमुपलब्धिक्रमोऽन्यत्र भेदकत्वेनादृष्टतया-त्रापि निष्फलत्वादनुपन्यसनीयः । तथाहि — पटो दशान्तादितरतो वा प्रक्रम्योपलभ्यमानः सन्नुपलब्धिक्रमभेदेऽपि न भिन्न इति प्रतीयते । अतोऽत्रापि कपिपिकयोर्न तन्निबन्धनो भेद इति निष्फलत्वमुपलब्धिक्रमभेदस्य । ननु प्रागुपवर्णितां विकल्पपरम्परामुल्लङ्घ्य समुल्लसन्नयं क्रमः कथमखण्डपदवादिनाप्यपह्नोतुं शक्यते । नैव तमपह्नुमहे । प्रत्युत यथाशक्ति समर्थयामहे । तथाहि — विकल्पनासहत्वादनिर्वाच्यः सन्नसौ क्रमस्तादृश्या पदतत्त्वस्यैकस्यैवानिर्वाच्यया स्वशक्त्या परिकल्पितः समुल्लसिष्यति । यथैव ह्यवयविनश्चाक्षुषस्यावश्यसमाश्रयणीयस्य चित्रस्यैकस्यावयवरूपानुगृहीतया दिक्छक्त्या नानात्वमाविर्भावतिरोभावौ क्रमिकत्वं वा परिकल्प्यते, तथा पदतत्त्वस्यैव व्यञ्जकभेदानुगृहीतया कालाख्यया स्वशक्त्या तदशेषं परिकल्पयिष्यत इति सर्वमनवद्यम् । अतो नैकधीस्थत्वं वर्णानामैकपद्यकृत्, कपिपिकयोर्भेदकस्य क्रमस्य रोधादैकपद्यापत्तेरिति गतमेतत् । एवं तर्ह्येकामर्थधियं कुर्वाणाः फलधर्माध्यासात् पदमित्यभेदेन भास्यन्ति, यथैकां विक्लित्तिं कुर्वाणा अधिश्रयणादयः पाक इति । एवञ्च कपिपिकयोरर्थभेदादेव पदभेद इति न पूर्वोक्तदोषावसरोऽपि । एतदपि न । एकार्थधिय ऐकपद्यसमुत्थत्वाद्, एकार्थधिया चैकपद्यावधारणेन्योऽन्याश्रयत्वात् । ननु भवद्भिरपि निरूपितशक्तिकाच्छब्दादर्थधीः तया च शक्तिनिरूपणमितीतरेतराश्रयप्रसङ्गपरिहाराय व्युत्पत्तिसमये प्रयो-

ज्यवृद्धगतयार्थधिया निरूपितायाः शक्तेः सर्वासु स्वप्रतिपत्तिषु प्रागेव प्रतिपत्तेरनुसन्धानमाश्रयणीयम्। एवं सत्यस्माकमपि परगतैकार्थधीकार्योपाहितैक्या वर्णाः सर्वासु स्वप्रतिपत्तिषु प्रागेव प्रतिपत्तेरनुसंहिततादृप्याः पदीभविष्यन्ति। एतदपि न। आरोपविषयेष्वेकया धियानवमृश्यमानेष्वैक्यस्योपाधातुमशक्यत्वात्। अ(वि?व)मृश्यमानेषु च क्रमरोधे सति पूर्वोक्तदोषानतिवृत्तेः।

ननु पदमिति समाख्या यौगिकी, पद्यते गम्यते ज्ञायतेऽनेनेति। अतस्तत्सम्भिन्ना पदमिति प्रतिपत्तिरर्थधियमनपेक्ष्य प्रागेव कथं स्यात्। मा भूत् पदशब्दसम्भिन्ना प्रतीतिः। तथापीदमिति सर्वनामसम्भिन्नतया सिद्धात्मन एवानेन पद्यत इति पराङ्गताप्रतिपत्तिः। 'अथैष विश्वज्योतिः, अनेन सहस्रदक्षिणेने'तिवदिति पूर्वसिद्ध एव तद्भेदः। अपिच अर्थप्रतीतिहेतुष्वपि चक्षुरादिषु पदशब्दादर्शनाद् रूढिरियं समाख्येति तत्सम्भिन्ना प्रतीतिः प्रागविरुद्धैव। नन्वगृहीतसम्बन्धस्य प्रश्लिष्टपठितेषु पदावग्रहाभावात् कथमर्थप्रत्ययात् प्राक् पदधीराख्यायते। अयमपि दोषो वाक्यवादिनां नास्ति। पदवादिनामप्यगृहीतेऽपि सम्बन्धेऽस्य पदस्य कोऽर्थ इति प्रश्नदर्शनादयं पनस इत्यादिषु च स्वरूपावकुण्ठितपदार्थधीदर्शनादव्यापको दोषः। यत्राप्यनवग्रहं मन्यसे, तत्रापि साक्षात्क्रियमाणस्यैव पदस्य *न्यासाश्लेषवशेन निष्कृष्यमाणस्य निष्कर्षणमात्रमर्थप्रत्यायनफलेन क्रियते दिग्विशेषसंयोगात्मनैवोत्क्षेपणादेरित्यदोषः। नन्वगृहीतेऽपि सम्ब-

* 'न्यायाश्लेष' इति वा स्यात्।

न्धेऽस्य पदस्य कोऽर्थ इत्यादिर्दृश्यमाना पदधीः 'सुप्तिङन्तं-पदमि'त्याद्यनुशासनोपाधिका । नैवम् । सुबन्ताद्यनभिज्ञस्यापि दर्शनात् । अवश्यं चैतत् । 'सुप्तिङन्तं पदमि'त्यनेनापि 'यो वा इमां पदशः' 'चत्वारि वाक् परिमिता पदानी'त्यादिव्यवहारसिद्धस्यैवानुगमात् । नचास्य सिद्धत्वे पञ्चपत्यदेवतादिवदपरिभाष्यत्वम् । परिभाषणस्य 'नः क्ये' (१. ४. १५) इत्यादिभिः कृत्रिमैः समीकर(ण ? णार्थ)त्वात् । अथ पदमिति महासंज्ञयैव संख्यासंज्ञापदावृत्त्यतिदेशयोरन्यतरसूचन्या सिद्धं समीकरणमपि । एवं तर्ह्यन्तर्वर्तिविभक्तिनिमित्तस्य पदस्यालौकिकत्वात् तदर्थोऽयमारम्भः सन् प्रसङ्गात् प्रतिपत्तिलाघवाय सिद्धमप्यनुगमिष्यति । अत एकार्थधीरपि स्वहेतूनां वर्णानामैकपद्यकृन्न भवति, ऐकपद्यसमुत्थत्वात् तस्या इति गतमेतदपि । अस्तु तर्हि शैघ्र्यादेकत्वावसायः । गौरित्यादिषु पद्मपत्रशतच्छेदवत् सोऽपि देवदत्तादिष्वव्यापक एव, पदेन प्रत्ययस्य स्पष्टत्वात् । एतदपि न शोभनम् । शैघ्र्यं हि न साक्षादेकत्वारोपे व्याप्रियते, अपितु भेदप्रतीत्यपहारद्वारेण । नचात्राल्पीयस्यपि गोशब्दादौ भेदप्रतीतिस्तेनापह्नूयते । नहि वयमपि भेदप्रतीतिमपलप्ष्यैकत्वं समर्थयामहे । किन्तु तामभ्युपगम्यैव तस्याः शिरसि पदं निक्षिप्य समुद्गच्छतैकत्वज्ञानेन । अत एव देवदत्तादिष्वपि भेदप्रत्ययस्य स्पष्टत्वं न दोषाय, अस्माकमेकाकारं चेज्ज्ञानमस्ति । अथ तन्नास्ति । तदेव स्पष्टं शब्देन विवक्षितम् । एतदपि वाङ्मात्रमेव । देवदत्ततितउप्रभृतिशब्देष्वप्येकमिदं पदमित्येकाकार-

ज्ञानस्य (सा ? स)र्वजनीनत्वेनापह्नोतुमशक्यत्वात् । अतः शघ्रयमार्प वर्णानामैकपद्यकृन्न भवति । तितउः अम्नायीत्यादिष्वनैकपद्यापत्तेरिति गतमेतदपि । तदेतत् सर्वमनुसन्धाय समुत्थितोऽयं प्रकर(ण)स्याद्यः श्लोकः—

नैकधीस्थत्वमेकार्थधीः शैघ्र्यं वैकपद्यकृत् ।
क्रमरोधात् तदुत्थत्वात् तितवादौ च दर्शनात् ॥ १ ॥

नकारोऽयं ब्रह्मनिष्ठो गुणक्रियादिरहितत्वेन विधिमुखप्रवृत्तशब्दान्तरागोचरेऽपि 'नेति नेती'त्यादावतद्व्यावृत्तिमुखेन दृष्टसामर्थ्य इति प्रसङ्गान्मङ्गलार्थोऽपि स्यादिति प्रथमं प्रयुक्तः । तदेवं प्रत्यक्षस्य तिस्रोऽन्यथासिद्धयो निरस्ताः ।

पुनरपरः शङ्क्यते स्फोटस्यार्थस्य वा व्यञ्जकानां वर्णानां बहूनामप्येककार्याणामेका करणशक्तिः सर्वैरभ्युपेया । अतस्तदृशाद् वर्णाः पदमित्यभेदेन भान्ति । एकसम्प्रदानशक्तिवशादिव देवा वसवो देवतेति । पूर्वमेकार्थधीरुपाधित्वेन शङ्किता । सम्प्रत्येका शक्तिरिति विशेषः । अत्राप्येकबुद्ध्यनवमृश्यमानेष्वारोपो न स्यात् । अवमृश्यमानेषु च क्रमोऽस्तमियादिति स दोषस्तदवस्थ एव ।

दूषणान्तरमप्युच्यते । शक्तिरियामेन्द्रियवत् पदज्ञानस्य जनकतामात्रेणोपपादिका ज्ञेयतयापि वा । तत्राद्ये पक्षे ज्ञेयमन्विष्यमाणं पूर्वोक्तेन न्यायेन वर्णातिरिक्तमेव पर्यवस्येत् । ज्ञानं हि कार्यरूपतया यथा कारणव्यतिरेकेण दुर्लक्षितम्, एवमवभासरूपतयावभास्यव्यतिरेकेणापि । अतो न जनकतामात्रेणावस्थिता शक्तिः पदज्ञानस्योपपादिका ।

नाप्यगृह्यमाणतया स्वगतं वर्णेष्वारोपयितुं शक्यम्। अतः स्वरूपसहकार्यनतिरिक्तशक्तिवादिनां शक्तिरप्यैन्द्रि(यि)-कीति साक्षात्काररूपपदज्ञानज्ञेयापि सेत्याश्रीयते। तत्रापि पक्षे यदि सा वर्णातिरिक्ता वर्णसमवायिन्येकापि, जाति-स्फोटदर्शनमेव वागन्तरेणाङ्गीकृतं स्यात्। अथ स्वरूपेणैका वर्णेभ्यश्चानतिरिक्ता, तथा सति वर्णानप्येकीकुर्यादिति व्यक्तिस्फोटदर्शनमेव शब्दान्तरेणाश्रितं स्यात्। प्रतिवर्णं तु भिन्ना सती पदमित्येकाकारज्ञानस्यानुपपादिकेत्यनुप-क्षेप्यैव। अपिच वर्णमात्रादनागता पदधीः 'तदागमे हि दृ-श्यत' इत्यनेन न्यायेन वर्णातिरिक्ततया प्रसिद्धापि यदि तद-पलापेन तदभिव्यक्तिहेतुषु सञ्चार्यते, तदानीम(नेनै? नयै)व दिशा सर्वकार्याणामवान्तरकारणापलापेन जगत्कारणादर्वा-चीनायाः कारणपरम्पराया अपलापप्रसङ्गः। अतो न वर्णाना-मेवैका शक्तिरैकपद्योपाधिरिति गतमेतदपि। तदेतत् सर्व-माह —

स्फोटस्यार्थस्य वा व्यक्त्यै शक्त्या तद्वत्सु नैक्यधीः।
अतीन्द्रियत्वाद्वा भेदात् सर्वानन्तरनिह्नवात्॥ २॥

एवं चतसृणामन्यथोपपत्तीनां निरासादेकाकारप्रख्या वर्णातिरिक्तविषयैव भवितुमर्हतीत्युक्तम्। यदि तूच्यते, ना-स्त्येतादृशी प्रख्या, उपाख्यैव तु केवलेदृशीति। सापि कथं यथोपवर्णितविषयां प्रख्यामन्तरेण स्यात्। तथाहि — गो-शब्दादर्थं प्रतिपद्यामह इत्यत्र शब्दादित्येकाकारेयमुपाख्या न

शब्दत्वमात्राभिप्राया, गवाश्वादिषु तदविशेषादर्थाविशेषप्रसङ्गात्। ना(पि) तद्वतीषु व्यक्तिष्वनाश्रितभेदासु, गोशब्दादिति व्यक्तिविशेषसामानाधिकरण्यात्। नाप्याश्रितभेदासु, तासां भेदादेकवचनानुपपत्तेः। नापि तासां समूहे, जातिशब्दानां जातितदाश्रयान् विहाय समूहे वृत्त्यदर्शनात्। नहि गोमण्डले गौरिति दृश्यते। अत एव हि 'ऊकालोऽज्—' (१.२.२७) इत्यज्ग्रहणेन संयोगवद् अच्समुदायस्यापि निवृत्तिर्व्याख्यायते। 'आशासाना मेधपतय' इत्यत्र तु मेधपतिशब्दस्याग्नीषोमसमुदायवृत्तित्वं यौगिकत्वाद् योगस्य च समुदायगामित्वादविरुद्धम्। सहकारा वनमित्यत्रापि समूहिनीष्वेव व्यक्तिषु लब्धसंस्कारस्य समूहसमूहिनोरभेदविवक्षाश्रयेण सामानाधिकरण्ये वाक्यीयः समुदायसंस्पर्शः। अत एवान्तरङ्गस्य बहुवचनस्यानिवृत्तिः। नचात्रेदृशमपि समुदायसंस्पर्शित्वम्, एकवचनानुपपत्तेरपरिहार्यत्वाद्, वनशब्दस्थानीयस्य च समुदायवाचिनः समानाधिकरणस्याभावात्। गकारादीनां समाहारद्वन्द्वमाश्रित्य समुदायसामानाधिकरण्यसमर्थनेऽप्येकवचनानुपपत्तेस्तादवस्थ्यं ह्रस्वप्रसङ्गश्च गुशब्दादिति। अतो न समूहेऽपि गीः। नाप्यन्त्यवर्णमात्रे, पूर्ववर्णपरामर्शस्यापि भावात्। नापि 'शृणोत ग्रावाण' इतिवदुपचारहेतुका बुद्धिः, स्खलनाभावात्। नापि भ्रमहेतुका, सार्वजनिक्या भ्रमहेतुत्वायोगाद्, भ्रमनिमित्तानां च प्रागेव निरासात्। अत उपाख्ययाप्यन्यथानुपपद्यमानया वर्णातिरिक्तविषया पदप्रख्या समर्थ्यत इति गतमेतदपि। तदेतत् सर्वमभिप्रेत्याह —

न शब्दत्वेन तद्वत्सु द्विविधेषु न तद्गणे ।
गोशब्दादिति गीर्नान्त्ये नोपचारान्नच भ्रमात् ॥ ३ ॥

तदेवमाद्यश्लोकद्वयदूषितान्यथासिद्धिचतुष्काया एकत्वधियः सद्भावोऽनेन श्लोकेन समर्थितः । नन्वन्यथासिद्धिनिरासात् तस्या यद्यपि कारणदोषनिमित्तमप्रामाण्यं नास्ति, बाधकप्रत्ययनिमित्तं तु भविष्यति । तथाहि—न तावद् वर्णेभ्यो निष्कृष्य पदतत्त्वमेकाकारधियैकतया व्यवस्थाप्यते अङ्गुलीभ्य इवाङ्गुष्ठवत् । अनिष्कृषन्ती पुनरेकत्वधीर्वर्णगतभेदप्रत्ययेन बाध्या । तन्न । अदृष्टकारणजाया धियोऽन्यां धियं प्रति बाध्यत्वायोगात्, सम्भावितदोषाणां च प्रागेव निरासात् । बाधकधीर्हि दोषजमेवाप्रामाण्यं ज्ञापयति, न तु (धि)यमेव जनयति । अतः सैवैका धीरन्यामनुकूलां धियमनुगृह्णाति प्रतिकूलां च निगृह्णातीति युक्तम् ।

ननु यद्येकत्वधियं भेदधीर्न बाधते, तर्हि तदवबोधितस्य भेदस्य का गतिः । उच्यते । जातिस्फोटदर्शने व्यक्त्याश्रयो भेदः । व्यक्तिस्फोटदर्शने व्यञ्जकाश्रयः सन् व्यङ्ग्येऽध्यारोपितो मणि(दर्प)णादिष्वभिव्यक्तमुखभेदवत् । जातिस्फोटवादिनो ह्यनेकव्यक्तिव्यङ्ग्या गोशब्दत्वादिजातिरुत्क्षेपणत्वादिवच्छब्द इत्याहुः । व्यक्तिस्फोटवादिनस्त्वसत्यवर्णविभाग एकोऽनवयवोऽभिव्यञ्जकधर्मानुविधायी शब्द इति । अस्य हि दर्शनद्वयस्य मूलं लोकशास्त्रप्रसिद्धा वर्णेषु भागधीः । अस्ति हि लौकिकानामपि ह्रस्वदीर्घप्लुतेषु परिपूर्णवर्णग्रहणात्

प्रागप्यणुतरकालभागादारभ्या (स?स्व)स्य निवृत्तेरव्यपदेश्या-भागधीः । व्यपदेश्या भागधीरप्यस्त्येव । ह्रस्वद्वयघटिता-नामिव दीर्घाणामकारेकारोकारघटितानामिव सन्ध्यक्षराणां रेफलकाराद्यवयवघटितयोरिवर्कारल्कारयोरुदात्तानुदात्तरूप - विरुद्धधर्माध्यासविभिन्नकालघटितानामिव च सर्वस्वरिताना-मुपलब्धेः । व्यञ्जकेष्वप्यानुमानिकी भागधीरस्ति । व्यक्त-शब्दावभासस्याव्यपदेश्यभागावग्रहपूर्वकत्वेनाक्षु सिद्धत्वात् । शास्त्रेष्वपि वर्णभागसमाहारव्यपदेशोऽस्ति । आम्नाये प्रण-वस्याकारोकारमकारसम्भृतत्वान्नानात् । व्याकरणे च 'त-स्यादित उदात्तमर्धह्रस्वम्' (१. २. ३२) इत्यादिदर्शनात् । मीमांसायामपि 'सामप्रदेशे विकारस्तदपेक्षः स्याच्छास्त्र-कृतत्वात्' (जै० ९. २. ३२), 'वर्णे तु बादरिर्यथाद्रव्यं (द्रव्य)व्यतिरेकाद्' (जै० ९. २. ३३) इति वृद्धतालव्यस्या-वयवविच्छेदाभ्युपगमात् । तदेवं लोकशास्त्रप्रसिद्धावपि वर्णै-कदेशधीर्यद्यपलप्यते, तर्हि जितम् । अनु(त्ता?त्तरा) गुरवः । अङ्गीकृतव(र्णा?र्णभागा)यास्तु तस्या द्वे गती, स्वतः प्रामा-ण्यम् अप्रामाण्यं वा दोषाद् इति । उभयोरपि पक्षयोर्यथाक्रमं जातिस्फोटव्यक्तिस्फोटावपरिहार्यौ । तथाहि — आद्ये पक्षे भागधीवद् वर्णपदवाक्यधियो विषयमपेक्षमाणाः सत्यो नाव-यव्यालम्ब(ब्नः?नाः) भिन्नकालैरवयवैरवयव्यारम्भासंभवाद्, इति जात्यालम्बना उत्क्षेपणादिधीवत् । ताश्च जातयो वर्ण-भागाभिमतास्वपकर्षपर्यन्तगतासु व्यक्तिषु प्रत्येकपरिसमाप्ता

अपि तारतम्येनोपचीयमानाः क्रमेण व्यज्यन्ते, स्पन्दत्वगमनत्वभ्रमणत्ववत् । तदुक्तं — "वर्णस्फोटाविरुद्धैकार्थसमवायौ पदस्फोटवाक्यस्फोटौ" इति । एकव्यक्तिग्रहणे तदग्रहणादभाव इति चेदितरत्रापि तुल्यम्, अभिव्यक्तेरावृत्तौ प्रतीतिरुभयत्रेति च । एवं तावद् वर्णभागधियः प्रामाण्ये जातिस्फोटस्यावर्जनीयत्वम् । पक्षान्तरे तु व्यक्तिस्फोटः समुत्तिष्ठति । एकत्वनानात्वधियौ ह्यनन्यथासिद्धे सामान्यस्य विशेषाणां च व्यवस्था(प?-पि)के भवतः । अन्यथासिद्धौ त्वन्यतरबाध एव, ज्वालैकत्ववद् वीचीन्दुभेदवच्च । तदिह नानात्वधीर्व्यञ्जकवशादप्युपपद्यमानतया सम्भवत्कारणदोषा सती प्रागुपपादितानन्यथासिद्धतयैकत्वधिया बाधनीयेत्यखण्डैव वर्णपदवाक्यस्फोटात्मिका शब्दव्यक्तिः । तथाहि — स्थानादिसाम्यसम्पादितसादृश्याकारेकारव्यञ्जकध्वनिसदृशपूर्वापरीभूतध्वन्यभिव्यज्यमानोऽयमेकारोऽखण्डोऽपि क्रमसादृश्याध्यासात् पूर्वापरीभूताकारेकारप्रश्लेषवानिव चकास्ति । तस्यैव च वृद्धतालव्यमाई भवतीत्याईभावे ध्वनिविच्छेदादेव विच्छिन्नाकारेकारानुकारी प्रतिभासो जैमिनीयैरङ्गीकृतः । अनेनैव च न्यायेन पदवाक्ययोरप्यसत्यो वर्णपदविभागानुगम इत्यखण्डता(या)मुक्तं — 'वाक्ये न पदानि, पदे न वर्णाः, वर्णेषु नैवावयवाः, तदवसायश्च नादक्रमनियमादि'ति । तदेवं वर्णभागधीप्रामाण्याप्रामाण्यमूलयोर्जातिव्यक्तिस्फोटदर्शनयोर्यथाक्रमं भेदधीर्व्य-

क्तिभेदविषया व्यञ्जकारोपितव्यङ्ग्यभेदविषया चेति स्थितम् ॥

ननु क्रमिकाणां ध्वनीनां यौगपद्यानुपपत्तेः प्रत्येकं व्यञ्जकत्वमास्थेयम् । तथाच सत्युत्तरे व्यर्थाः स्युः । आवृत्तिद्वारेण व्यक्ततरपरिच्छेदार्थ इति चेन्न । गध्वनिरेवावर्तमानो व्यक्ततरां धियमादध्यात् । आवर्त्यमानोऽप्यसौ गगनादिस्फोटसाधारण्यात् समाधातुमशक्त इति चेदुत्तरेऽप्यौपगवादिसाधारणा इति न शक्नुयुः, प्रत्येकमनेकसाधारणा अप्यूर्ध्वताकाककत्ववदचोऽन्यसन्निहिता नियतां धियमादधतीत्यदोषः । तथाहि — गध्वनिमात्राद् घटादिस्फोटवैषम्ये विदितेऽपि गगनादिवैषम्याय विजातीयोपनिपातापेक्षा । पुनर्गौतमादिवैषम्याय विसर्जनीयापेक्षा । उत्तरोत्तरस्यापि पूर्वपूर्वव्यतिरेकेण बहुसाधारणत्वान्न कस्यचिदानर्थक्यमिति सर्वमवदातम् । तदेतत् सर्वमाह —

नादुष्टजान्यबाध्या धीः सैवान्यानुग्रहादि(कम्?कृत्)।
व्यक्तिस्थो व्यञ्जकोऽर्थो वा भेदस्तेऽप्यूर्ध्वतादिवत् ॥

ननु पदे वर्णानां वाक्ये पदानां भेदः क्रमो विच्छेदश्च व्यक्तमवसीयते, तितऊनेति ब्राह्मणा आगता इति च । अतः कथमखण्डता तयोर्हृदयमारोहेत् । दत्तोत्तरमेतत् । तथाहि—यथा सामसु वृद्धतालव्यमा(नु?ई) भवतीत्येकारैकारयोरखण्डयोरपि व्यक्तिविषयतया व्यञ्जकधर्माध्यासवशतया वा भेदक्रमविच्छेदधीः परैराश्रयणीया, तथास्माभिर्वा-

क्यपदयोराश्रयिष्यते । अतश्च समानन्यायत्वेऽपि यदि पूर्वापरीभूतवर्णपदव्यतिरिक्तपदवाक्यापह्नवः क्रियते, तथासति पूर्वापरीभूतभागातिरिक्तवर्णापह्नवोऽपि स्यात् । ते चापकर्षपर्यन्तवर्तिनः परस्परानुपश्लिष्टवपुषो व्यपदेशनिमित्तवर्णपदवाक्यजात्यपलापादव्यपदेश्याः सन्तो व्यवहारमिममतिवर्तेरन्निति शब्दहानिः स्यात् । ततश्च तत्संभेदवेदनीयमर्थजातमपि न ज्ञायत इति सर्वाभावप्रसङ्गः । तदुक्तं—'तान्येव पदानि वाक्ये त एव वर्णाः पदेषु चेद् वर्णेषु वर्णभागानां परमाणुवद् भेदः । तेषामव्यपदेश्यत्वान्न वर्णो न पदमि'ति । अथ वर्णानामनङ्गत्वमाश्रित्य ततः प्रागेव प्रकर्षो नास्तीति सर्वाभावप्रसङ्गो बालबिभीषिकामात्रमित्युच्यते । तथासति परेणापि नियतवर्णानुकारिभागक्रमविच्छेदधियमन्यथासिद्धीकृत्य सन्ध्यक्षराणामनंशताश्रयणीयेति तेनैव न्यायेन पदवाक्ययोरनंशताश्रयणीया स्यादिति व्यक्तिस्फोटापत्तिः, निर्भागवर्णाभ्युपगमे व्यक्तिस्फोटापात इति । तदेवं वर्णभागधियः सत्यमिथ्यात्वयोर्जातिव्यक्तिस्फोटौ दुरपह्नवाविति गतमेतत् । तदेतत् सर्वमाह —

वृद्धतालव्यवद् भेदक्रमविच्छेदधीरतः ।
न वर्णोऽपि पदाभावे वर्णेऽनंशे पदं तथा ॥ ५ ॥

अत्र परिच्छेदे

ऐक्यान्यथासिद्धिमदूदुषाम
तथैकधीस्थत्वम(सी)षिधाम ।

नानात्वसंवित्तिमयूयुजाम
सन्ध्यक्ष(राण्या ? रन्या)यमवीवदाम ॥

इत्याचार्यभरतमिश्रकृतौ स्फोटसिद्धौ
प्रत्यक्षपरिच्छेदः समाप्तः ॥

अथार्थपरिच्छेदः ।

तदित्थं गौरित्युच्चारणे सत्येकत्वनानात्वप्रत्ययान्यथासिद्धिनिरसनसमर्थनाभ्यां प्रत्यक्षेण वर्णातिरिक्तं पदं व्यवस्थापितम् । अधुना तु प्रत्यक्षसन्निकृष्टस्यापि तस्य वर्णाकारविपर्यासदूषितत्वाद् दृढीकरणाय प्रत्यक्षसाक्षित्वेनार्थप्रत्ययान्यथानुपपत्तिरुपन्यस्यते । तथाहि — नान्त्यवर्णमात्रादर्थधीः । नापि पूर्ववर्णसत्तामात्रसहितात् । अतीतोपलब्धिकतत्साहित्यमपि चिरानन्तरातीतोपलब्धिकत्वेन भिद्यते । उपलभ्यमानतत्साहित्यमपि क्रमवदुपलब्धित्वान्नास्ति । सदपि वा वक्तृभेदं प्रसञ्जयेत् । पूर्ववर्णग्रहणजसंस्कारसहितादन्त्यवर्णात् तदर्थधीरिति चेत् । तदपि न । वस्त्वन्तरग्रहणजस्य संस्कारस्य वस्त्वन्तरज्ञानजनकत्वादर्शनात् । नन्वन्यत्रादृष्टतथाभावस्यापि संस्कारस्येह स्मरणफलकृतसत्ताकस्य तद्भावभावनीमर्थधियं प्रति शक्तिमात्रकल्पनास्तु, तस्याः शक्तेः स्फोटकल्पनातो लघीयस्त्वात् । तदयुक्तम् । भवद्भिरेव,

"लौकिकं वापि यत् कर्म फले कालान्तरोद्गतौ ।
तत्रापि शक्तिरेवास्तु"

इति संस्कारस्यानुभवशक्तिरूपताभ्युपगमात् । शक्तेश्च शक्त्यन्तरायोगात् । तथाहि— पदार्थस्यैन्द्रियकं रूपं सर्वकार्याणि प्रत्यविशिष्टमिति सर्वसम्भवप्रसङ्गे, तत्परिहाराय कार्यविषयनियतमतीन्द्रियं रूपं शक्तिरिति गीयते । अतस्तस्याः कार्यान्तरं प्रति रूपमेव नास्तीति कार्यान्तरस्य तद्भावभावित्वायोगाच्छक्तेः शक्त्यन्तरं न घटते । अथ कार्यान्तरस्य तद्भावभावि(त्वा ? त्व)समर्थनाय सर्वसाधारणरूपा शक्तिराश्रीयते, तर्हि सापि शक्तिमानिवानाश्रितशक्त्यन्तरा कार्यनियमाय नालमित्यपरशक्तिकल्पनायामनवस्थेत्येवमपि शक्तेः शक्त्यन्तरं न युज्यते ।

अपिच क्रमान्तरे स्मरणफलक्लृप्तसत्त्वसंस्कारसंभवेऽप्यर्थप्रत्ययादर्शनात् तद्भावभावित्वव्यभिचारः । अपिचाभिमतानभिमतक्रमयोरप्यविशिष्टौ स्मृतिहेतुसंस्कारादेकत्र स्मरणार्थधियावपरत्र स्मरणमात्रमिति विलक्षणकार्योदयो न युज्यते । विशिष्ट एवार्थधीशक्तिसदसद्भावाभ्यां संस्कार इति चेत्, तर्हि स एव विलक्षणो विशेषविकलाद् वर्णानुभवान्न घटते । नह्येकैको वर्णानुभवो विशेषवान् । नाप्येनं वर्णान्तरानुभवो विशिनष्टि, क्रमिकतया सन्निधानाभावात् । पूर्ववर्णानुभवजसंस्कारसन्निधानमुत्तरवर्णानुभवस्य विशेषकमिति चेत्, तदप्याद्यवर्णानुभवस्य नास्तीति ततो जायमानः संस्कारः स्मृतिमात्रहेतुरिति नासावर्थधियं जनयितुं नाप्युत्तरवर्णानुभवं विशेषयितुं वा शक्तः । एवं सत्युत्तरोत्तरोऽपि विशे-

षविकल एव, सन्निहितेनापि पूर्वसंस्कारेणाविशेषितत्वादिति विलक्षणसंस्कारानुत्पत्तिः। ततश्च स्मृतिविलक्षणस्यार्थप्रत्ययस्यानुपपत्तिः। एवं तर्हि सर्वसंस्कारजा सकलवर्णग्राहिण्येका स्मृतिरर्थधीहेतुः। तदपि न। क्रमप्रत्यस्तमयेन जरा राजेत्यादावर्थाविशेषप्रसङ्गात्। अतो न भावनालक्षणः संस्कारः स्वरूपेण शक्त्यन्तरेण स्मरणेन वा द्वारीभूतेनार्थधीहेतुः। तर्हि भावनाव्यतिरिक्त एव काश्चित् कर्मजन्यापूर्वस्थानीयोऽर्थधियं करिष्यति। तदपि न। वेगभावनास्थितस्थापकात्मकसंस्कारत्रयस्यापि स्वकारणसजातीयकार्यजनकतया तद्विजातीयकार्यसंस्कारायोगात्। वर्णानुभवार्थधियोर्भिन्नविषयत्वेऽपि ज्ञानत्वेन सजातीयतेति चेद्, एवमप्यपूर्वसंस्कारस्य न कल्पक(मित्य ? म्, अ)स्मदीयलघुकल्पनयैवार्थधीघटनात्। नापि जनकमस्ति। प्रत्येकं वर्णानुभवस्य क्रमान्तरेऽप्यविशेषाद्, विशेषान्तराभावस्योक्तत्वात्। नापि फलमस्ति। नहि तद्विशिष्टो विसर्जनीयोऽतीन्द्रियविशेषणत्वात् सम्बन्धग्रहणापेक्षामर्थधियं जनयितुं शक्नोतीति चेत्, पूर्वे वर्णा विसर्जनीयस्य विशेषकाः। तदानीं निरुद्धबुद्धित्वाद्, एकबुद्ध्युपारोहे च क्रमप्रत्यस्तमयात्। अतो न भावनाव्यतिरिक्तोऽपि संस्कारोऽर्थधीहेतुः। तदेतत् सर्वमभिप्रेत्याह —

अर्थधीकृन्न संस्कारो न तच्छक्तिर्न तज्जधीः।
न तस्यापूर्वकल्पस्य कल्पकं जनकं फलम्॥

एवं तावद् द्विप्रकारस्यापि संस्कारस्यार्थधीहेतुत्वं निरस्तम्। वक्रैकताप्यर्थधीहेतुर्न भवति। तिरोहितेऽपि वक्तरि

व्युत्पत्तिप्रतिपत्त्योर्दर्शनात् । नहि तिरोहितवक्रैकतानेकतावगमोपायो भवतोऽस्ति । नचानवगतायां तस्यां तदपेक्षव्युत्पत्तिप्रतिपत्ती युज्येते । अस्माकं तु सम्बन्धग्रहणापेक्षव्यक्तित्वात् स्फोटस्य तदवगमो न दोषाय । तत एव च फलभूतादवगमोऽपि युज्यत इति न विरोधः ।

अपिच तावन्तस्तादृशास्ते च तदर्थप्रतिपादनाय प्रयुज्यमाना वर्णा नार्थधियं जनयन्ति वृषभादिशब्द इति सर्वप्रकारजुषां वर्णानां व्यभिचारः । संख्यान्तरावध्यन्तरायोगात् तावत्त्वतादृशत्वयोरसिद्धिरिति चेद्, भावरूपयोर्नासिद्धिः । इतरनिवृत्तिरूपयोरसिद्धिरिति चेत्, तर्हि संख्यावध्यन्तरयोस्तावत्त्वतादृशत्वविघातिनोरुपादानं दोषायैव स्यात् । संख्यान्तरावध्यन्तरयोरप्यर्थधीहेतुत्वात् सोऽपि दोषः परिहृत इति चेद्, एवमपि संख्यान्तरावध्यन्तरोपादानमन्याय्यमेव भवतां, प्रक्षालनाद्धि पङ्कस्य दूरादस्पर्शनं वरमिति । अस्माकं तु वृषभशब्दे तावन्तस्तादृशास्ते च वर्णाः परमार्थतो न सन्ति । तत्र तेषां सन्ध्यक्षरादावकारादिभागध्वनिसादृश्यमात्रेणारोपितत्वाद् ध्वनय एवास्माकं स्फोटस्याभिव्यञ्जकाः, न वर्णाः । वर्णधियस्तु स्फोटस्यैवान्यथाख्यातयः, सन्ध्यक्षरस्येवाकारादिधियः । तेऽपि ध्वनयो युष्माभिरपि नियतशक्तिका वर्णान् प्रति व्यञ्जकत्वेनाङ्गीकृता एव । तेषु च स्वगतधर्माध्यासनिमित्तत्वेनाभ्युपगता नादवृद्धिः परेत्यसत्यवर्णारोपनिमित्तता च ध्वनीनां भवद्भिरप्यभ्युपगतप्राया, वृद्धतालव्यादेरकाराद्यनुकारिप्रत्ययरूषितस्याप्यखण्डताभ्युपगमात् । अतो

ध्वनिकल्पना तत्प्रकारविशेषकल्पना चास्माकमधिका न भवति । ननु ध्वनय एव तावन्तस्तादृशास्ते च वृषशब्दस्फोटं वृषशब्दे व्यञ्जयन्तीति चेत् स्फोटस्यार्थधीव्यभिचारित्वम् । न व्यञ्जयन्ति चेद्, ध्वनीनां स्फोटाभिव्यक्तिव्यभिचारित्वमिति समानः पर्यनुयोगः। न समानः, प्रयत्नभेदेनोभयत्राप्यस्माकं ध्वनिभेदात् । तथाहि — वृषशब्दमुच्चारयामि वृषशब्दमुच्चारयामीत्येवम्प्रत्यक्षसिद्ध एव तावदिच्छाप्रयत्नभेदः । कारणभेदे च नियतः कार्यभेदः । तथाच ध्वनीनामपि भेदोऽस्त्येव । अन्यथा भवतामपि नियतवर्णाभिव्यक्तिहेतुध्वनिप्रेरणाय प्रयत्नविशेषपरिग्रहायोगात् । अतोऽस्माकं नास्ति व्यभिचारः । तस्मान्न वक्रैकताया नापि सर्वप्रकारजुषां वर्णानामर्थधीहेतुता । तदेतत् सर्वमभिप्रेत्याह —

धीर्वो व्यपेतवक्रैक्ये व्युत्पन्नाद्योरहेतुता ।
तावन्तस्तादृशास्ते च तदर्था अपि नो क्षमाः ॥

अतः संस्कारद्वयस्य वक्रैकत्वस्य च सर्वावस्थवर्णानां चार्थधीहेतुत्वायोगाद् हेत्वन्तरं कल्प्यम् । ननु तत्रापि संस्कारकल्पना स्फोटकल्पना चेति गौरवम् । प्रमाणवत्त्वात्तु सदपि गौरवं न दोषः। अतीन्द्रियसंस्कारसहितो ह्यन्त्यवर्णः सम्बन्धग्रहणापेक्षामर्थधियं कर्तुमशक्तः तन्निरपेक्षां तु स्फोटधियं कर्तुं शक्त इति प्रमाणवत्त्वं गौरवस्य । अपिच गौरवमप्यस्माकं नास्त्येव । नहि तयोरेकापि कल्पनास्माकमस्ति । तथाहि — न तावत् स्फोटकल्पनास्त्यस्माकम् । तस्य प्रत्य-

क्षत्वोपपादनात् । नाप्यपूर्वसंस्कारकल्पनास्ति, भावनासंस्कारादेव क्लृप्तात् स्फोटव्यक्त्युपपत्तेः । तथाहि — प्रथमनादव्यज्यमानस्फोटधीजनितः संस्कारस्तत्रैव व्यक्ततरां धियमुत्तरनादसहितः करोतीति नापूर्वसंस्कारकल्पनाप्यस्ति ।

ननु निरवयवस्य स्फोटस्य कथमव्यक्तधीविषयत्वम् । स ह्युपलब्धतानुपलब्धतात्मा । नचैकस्य निरवयवस्योपलब्धतानुपलब्धते युगपदुपपद्येते । अवयविनस्तु स्थूलानामवयवानामुपलम्भात् सूक्ष्माणां चानुपलम्भात् तद्द्वारेणाव्यक्तता युज्यते । कथं युज्यते । यावतोपलब्धेष्ववयवेष्वनुपलब्धता नास्तीति न तेषामव्यक्तता । (अनुपलब्धेषु चोपलब्धता नास्तीत्याद्यमेव नापि तेषामव्यक्तता । अतोऽवयवेष्वेवाव्यक्ततताभावात् तद्द्वारा कथमव्यक्ततावयविनः । अथ प्रत्येकमवयवानां तदभावेऽपि समुदितानामुपलब्धतानुपलब्धता नास्तीति तद्द्वारमव्यक्तत्वमवयविनः ?) । कथं तद्द्वारता । किं ततो जायते । उत ततोऽध्यस्यत इति । न तावदाद्यः कल्पः । उपलब्धेभ्योऽवयवेभ्योऽवयविन उपलब्धताजन्मन्यपि अनुपलब्धेभ्योऽनुपलब्धताजन्मायोगात् । अनुपलब्धता ह्युपलब्धिप्रागभावतारूपा । सा च कथं जायते । असावौत्सर्गिकी सती स्वापवादभूता(या)मुपलब्धौ जायमानायां कथं तया सहावतिष्ठते । उपलब्धावयवहेतुकायामुपलब्धौ जातायामपीतरावयवहेतुका न जायत इति प्रतियोगिभेदादुत्सर्गापवादभावौ सिद्धाविति चेत् । तर्हि धारावाहिकसंविदामेकया स्फुटोपलब्धेऽपि वस्तुनि तद्विषयद्विती-

याद्यभावादस्फुटताप्रसङ्गः । याभ्यामुपलब्धतानुपलब्धताभ्या-मव्यक्तावयविनि जन्या(स ? सा) तद्व्यङ्ग्यतया भेदेन निरूप्य-माणावयवान्तराभावादनवयव इति तद्वदव्यक्तता स्फोटेऽपि स्यात् । उपलब्धतानुपलब्धतयोरध्यासकल्पोऽप्ययुक्त एव, आरोपविषयारोप्ययोर्ज्ञानव्यतिरेकेणाध्यासायोगात्। उपलब्धे-श्चोपलब्धताध्यासानुपयोगात् । अनुपलब्धतायाश्चानुपलब्ध-ताया अध्यासासम्भवात्। अतो नोपलब्धतानुपलब्धतात्मि-केयमव्यक्तता । अपितु ज्ञानजातेरवान्तरजातिरूपा परोक्ष-तापरोक्षता (ता?)वदुपलब्धेरेव तारतम्येनावस्थिता । अपाट-वात्मिकेयमव्यक्ततेति सावयववदनवयवेऽपि सा न विरुध्यते। अपिच व्यक्ततरदर्शनाभ्यासवेदनीयत्वाज्जातिरूपे रत्न(त ?)त्वे नावयवेऽप्यव्यक्तधीर्दृष्टा । उपलब्धानुपलब्धावयवसंभिन्नाव-यविसम्भेदावसेयत्वाद्रत्नजातावव्यक्ततेति चेत्, तर्हि तद्वदुप-लब्धानुपलब्धध्वनिसम्भेदावसेये तज्जन्यान्यथाख्यातिरूप-वर्णसम्भेदावसेये वा स्फोटेऽपि तदविरोधः । अपिच श्लोकादौ दृष्टकात्स्न्र्येऽपि कृत्स्नदर्शनाभ्यासवेदनीये दृष्टेयमव्यक्ततेत्यतो-ऽप्युपलब्धतानुपलब्धतात्मानमनुभवतीति तद्वदनवयवेऽप्य-विरुद्धा । तदेतत् सर्वमाह —

नच नः कल्पने दुष्टे नचैका व्यक्तिकल्पना ।
साङ्गवज्जातिवद् दृष्टकात्स्न्र्यवद्वा स्फुटापि धीः ॥

ननु प्रागन्त्यवर्णाद् वर्णा एव भान्ति, नतु तदति-रिक्तं व्यक्तमव्यक्तं वा किञ्चित् । स्फोटस्यैवान्यथाख्यातयो वर्णधिय इति चेन्न । अन्यथाख्यातिकारणाभावात् । नहि

धीहेतूनामेव ध्वनीनां भ्रान्तिहेतुता युक्ता, स्वतः प्रामाण्यानुपपत्तेः । नैष दोषः । ध्वनिर्धीहेतुः । तदंशानां तु स्फोटान्तरध्वन्यंशसादृश्यानि भ्रान्तिहेतव इति धीतद्भ्रान्तित्वयोः कारणभेदात् । ननु सर्वत्रापि वर्णाभावे कथमन्यथाख्यातयोऽपि तद्रूपाः स्युः, दृष्टरूपारोपत्वात् तासाम् । नह्यदृष्टरजतस्य शुक्त्यादौ तद्रूपारोपोऽस्ति । अयमपि दोषो नास्ति, एवं परमात्मनि पदे वर्णसद्भावाविरोधेन तस्यैव तत्रारोपसंभवाद् बाह्यार्थरहितेष्वपि वर्णेषु नाव्यापकत्वं, परिहारस्य तेषामप्यनुकार्यरूपपदार्थ(क?)तावस्थायां पदतत्त्वसम्भवात् अत एकवर्णात्मनि पदे वर्ण एव पूर्वापरीभूतैर्ध्वनिभिः क्रमेण स्फुटीभवन् स्फोटः । एकपदात्मनि च वाक्ये पदमेव, अवान्तरवाक्यस्वरूपे च स्वतन्त्रवाक्ये च तेषामेवानेकवर्णपदवाक्यात्मकेषु पदवाक्यमहावाक्येष्वारोपितत्वं भवन्मत इवाकारादीनां सन्ध्यक्षरादिषु । अथवान्यत्र सत्यवर्णाभावेऽपि तद्रूपाः ख्यातयो न विरुध्यन्ते । तथैकस्मिन्नपि स्फोटे स्थानादिभेदेन ध्वन्यंशाः परस्परविलक्षणाः सन्तो व्यङ्ग्येऽपि स्वगतवैलक्षण्याध्यारोपेण परस्परविलक्षणाकारां प्रतीतिमुत्पादयन्ति, मणिकृपाणदर्पणादिवत् तथा त एवांशाः स्फोटान्तरध्वन्यंशैः प्रातिनियतैः स्थानादिसाम्येन लब्धसादृश्याः सन्तः स्वगतसादृश्याध्यासात् तद्व्यङ्ग्यधीभिः परस्परविलक्षणाकाराभिः सङ्कीर्णाकारगामिनीस्तास्ताः प्रतीतीः कुर्वन्ति । ते च बुद्ध्याकारा उक्तप्रकारव्यङ्गकध्वनिवैलक्षण्यसालक्षण्याध्यासनिमित्ता एकस्मिन्नपि स्फोटे

विलक्षणाः सङ्कीर्णाश्च सन्तो वर्णपदास्पदतां प्रतिपद्यन्ते, पङ्क्तिर्यूथ(मिति) बुद्ध्याकारा इव पङ्क्त्यादिपदास्पदतामित्यन्यत्र तत्सद्भावे न कश्चिदुपयोगः। ननु वायवस्तद्गुणा वा संयोगविभागा ध्वनय इति तेषामश्रावणत्वात् कथं तद्व्यङ्ग्ये स्फोटे तद्धर्माध्यारोपः। नैष दोषः। अतीन्द्रियनेत्रवृत्तिनानात्वाध्यारोपस्य चन्द्रादौ दृष्टत्वात्। यद्यपि नेत्रवृत्तिबदरकाद्यवस्थापना चाक्षुषी, तथापि चन्द्रादौ स्वगतनानात्वाध्यारोपदशायामतीन्द्रियेति न दृष्टान्तवैषम्यम्। वायुतद्गुणातिरिक्तनादवादिनस्तु केचित् स्फोटश्लिष्टतया तद्ग्रहणमिच्छन्ति।

अपरे तु दूरादौ नादमात्रग्रहणमपीत्यनयोरध्यारोपः सुघट एव। उक्तं हि — "दर्शनं धीरैः शब्दरूपादविभक्तग्रहणो रूपादीनामिवालोको ध्वनिरिन्द्रियवदसंवेद्यमन्ये स्वतन्त्रं चे"ति।

ननु भ्रान्तित्वे नियमानुपपत्तिः। न। इह हि परमार्थरज्जुविज्ञानात् पूर्वं नियतभाविनी भ्रान्तिः, कदाचिदेव दर्शनात्। नच नियतरूपा, सर्पबिलादीनामनियमेनान्यतराकारिणीत्वदर्शनात्। नापि नियतक्रमा, कदाचिद्धि सर्पाकारभ्रान्तिपूर्विका बिलाकारभ्रान्तिः, कदाचिद् विपर्ययः। इह तु वर्णधियो नियतभाविन्यो नियतरूपाश्च नियतक्रमाश्चेति कथं भ्रान्तित्वम्। नैष दोषः। भ्रान्तित्वेऽपि नियमत्रयस्य निमित्तनियमैरुपपद्यमानत्वात्। संख्याभ्रान्तिषु च नियमत्रयदर्शनात्। आर्षे च शब्दज्ञाने सर्वभ्रान्तिविरहात्।

तथाहि — व्यञ्जकसादृश्यं भ्रमनिमित्तम्। तच्च स्फोटे व्यज्यमाने नियतभावि नियतरूपं नियतक्रमं चेति तन्निमित्तायां भ्रान्तावपि नियमत्रयोपपत्तिरित्यप्रयोजकं भ्रान्तित्वमनियमस्य। तथा पारमार्थिकमहाप्रतिपत्त्यौपयिकीष्वसत्यपूर्वसंख्याधीषु नियमत्रयदर्शनाद् व्यभिचरति भ्रान्तित्वमनियमः। नियमत्रयमप्युच्चारितशब्दश्राविणि प्राकृतजन एव। ऋषयस्तूच्चारणनिरपेक्षाः शुद्धेनान्तःकरणेनास्तमितसमस्तविपर्यासं शब्दतत्त्वं साक्षादीक्षन्त इति वक्ष्याम इति न तेषां भ्रान्तिः, नतरां भ्रमान्नियमा इत्यसिद्धता च। नियमत्रयस्य बाधकाभावे कथं भ्रान्तितेति न वाच्यम्। अध्वनि सादृश्यरूपकारणदोषधिया अनन्यथासिद्धिकैकाकारधिया च बाधसंभवेन बाधाभावस्यासिद्धत्वात्। तदे(व?वं) ध्वनिभागानां प्रतिनियतैः स्फोटान्तरध्वनिभागैर्यानि सादृश्यान्याश्रयप्रतियोगिभेदेन भिन्नानि तानि भ्रमनिमित्तानि। सादृश्यानियमाश्च भ्रमनियमनिमित्तान्युच्चरितशब्दश्राविणि प्राकृतजन इति गतमेतत्।

नन्वनेनैव न्यायेनार्थ एवाव्यक्तोपलब्धः सन् क्रमेण स्फुटीभविष्यतीति मान्तरालिकेन स्फोटेन। नैतदस्ति। यतोऽक्षजैव धीरव्यक्ता भवति। मानान्तरजा तु सम्यङ्निरूपिते सम्बन्धिनि व्यक्तैव, प्राक्तु न जायत एवेति नाव्यक्ता। अतोऽभिधेयधीर्नाव्यक्ता भवितुमर्हतीति न तत्रायमुपलब्धिक्रमो युज्यत इति गतमेतत्। ननु 'अनेकव्यक्तिव्यङ्ग्या गोशब्दत्वादिजातिरुत्क्षेपणत्वादिवच्छब्द' इति केचित्। 'असत्य-

वर्णविभाग एकोऽनवयवोऽभिव्यञ्जकधर्मानुविधायी शब्द' इत्यन्ये । बुद्ध्यनुसंहारमन्तस्तत्त्वमेकं भागैः प्रकाशितमपरे शब्दमाहुः । इति जातिव्यक्त्यन्तस्तत्त्वदर्शनभेदैर्बहुधा विकल्पितत्वादव्यवस्थितमिदं दर्शनम् । नाव्यवस्थितम् । त्रयाणामपि दर्शनानामधिकारितारतम्यापेक्षया भेदेनोपक्रान्तानामप्युपसंहा(रविरहात् ? राविरोधात्) । तथाहि — अत्यन्तभेददर्शिनं प्रति प्रत्यस्तमितभेदस्याभे(दः ? दस्य) सहसैव दुरुपपादत्वाद् भेदानुपमर्देनाभेदप्रतिपादनमात्रं तावत् करिष्यामीति जातिस्फोटदर्शनमुपादर्शि । तत्रापि,

"सत्यासत्यौ तु यौ भागौ प्रतिभावं व्यवस्थितौ ।
सत्यं यत् तत्र सा जातिरसत्या व्यक्तयः स्मृताः ॥"

इति सत्ताद्वैतन्यायेनासत्यवर्णविभागत्वं स्वतन्त्रत्वं च पर्यवस्यतीति व्यक्तिस्फोटदर्शनादन्ततो नास्ति विशेषः । तथा जातिस्फोटदर्शनं प्रति भेदस्य बहिर्भावस्य च सद्यः क्रियमाणं निराकरणं न बुद्धिपथमधिरोहतीति बाह्यता(नाप ? नपा)करणेन भेदनिरासमात्रमधुना करि(ष्यताामि ? ष्यामी)ति प्रत्यस्तमितवर्णभेदः स्वतन्त्रो व्यक्तिस्फोट उपक्षिप्तः । तस्य च कल्पितभेदत्वेन मृत्सलिलप्रच्छन्नबीजादिवच्चा(सा)धारणकार्यादर्शनेन स्वभाववैलक्षण्यान्नार्थक्रियावैलक्षण्यादन्तस्तत्त्वविविक्ततेत्यन्तर्मात्रतैव पर्यवस्यतीति दर्शनत्रयस्याप्येकत्वावसायित्वान्नास्ति विरोधः । एवं स्थूल(ता?त)राणामपि दर्शनान्तराणां वाक्यपदीयोपात्तानामुपसंहाराविरोधित्वं द्रष्टव्यम् । उपायमात्रं हि प्रतिपत्तृरुचिवैचित्र्यापेक्षयोपक्षिप्तैर्दर्शनभेदैर्भिद्यते । तदुक्तम् —

"उपादायापि हेयांस्तानुपाया(त्?न्) सम्प्रचक्षते ।
उपायानां च नियमो नावश्यमधितिष्ठ(ते?ति) ॥"

इति । तदेतत् सर्वमभिप्रेत्याह —

ध्वन्यंशसाम्यनियमैर्भ्रमस्तन्नियमा जने ।
नानक्षजा धीरव्यक्ता न वदामोऽन्ततो भि(दा?दाम्) ॥

इह च परिच्छेदे,

इत्थं निरास्थामहि सर्वथार्थधी-
प्रक्लृप्त्युपायान् परवादिकल्पितान् ।
स्फोटस्फुटीभावनिबन्धनध्वनि-
प्रभावमप्यत्र समार्तथामहि ॥

इत्याचार्यभरतमिश्रकृतौ स्फोटसिद्धावर्थ-
परिच्छेदः समाप्तः ॥

अथागमपरिच्छेदः ।

एवमर्थप्रतिपत्त्यन्यथानुपपत्त्या वर्णातिरिक्तं वाक्तत्त्वमुपदर्शितम् । इदानीमार्षप्रत्यक्षप्रतिपादनपरेणागमेनाप्युपपादयति । तथाहि — 'उत त्वः पश्यन्नि'त्यादि(मन्त्र)वर्णानुसारेण वर्णातिरिक्तं पदतत्त्वमवसीयते । अयं हि तस्यास्येनार्थः — त्वः कश्चिद् वाचं स्वनभेदावसेयभूधरादिविवर्तात्मनावस्थि(तं?तां) पश्यन्नपि विपर्यासत्वाद् वाचं पश्यामीति नानुसन्धत्ते । अपित्वन्यदेव पश्यामीत्यभिमन्यत इति फलतो न पश्यति । यथा कश्चिद् रज्जुं सर्पादिरूपविवर्तां पश्यन्नप्यन्यथाख्यातिविप्रलब्धबुद्धितया रज्जुं पश्यामीत्य-

ननुसन्दधानोऽन्यदेव पश्यामीत्यभिमन्यमा(न ? नः) फलतो रज्जुं न पश्यतीत्युच्यते, तद्वत् । तथा अन्यो वाचमर्थं ब्रुवाणां पूर्वपूर्वनादप्रभाविताव्यक्तज्ञानजनितवासनासनाथै-रुत्तरोत्तरनादैः क्रमेण स्फुटीभवन्तीमेकं पदमेकं वाक्यमेकं महावाक्यमित्यादिरूपेण शृण्वन्नपि व्यञ्जकारोपितनान्त-रीयकभेदक्रमविच्छेदविप्रलब्धतया 'गकारौकारविसर्जनीया इति भगवानुपवर्षः' इति ब्रुवाणोऽपलपतीति फलतो न शृ-णोति । उपवर्षो हि भगवान् स्वरानुनासिक्यकालभेदवद् वृद्ध-तालव्यांशभेदवच्चाकल्पितभेदाश्रयत्वात् सकलस्य द्वादशल-क्षणीव्यवहारस्य प्रकृतोपयोगितया व्यावहारिकमेव शब्दं दर्शितवान् न तात्त्विकं, प्रकृता(नुप)योगादिति तद्वचनविरोधो नाशङ्कनीयः । ऋषीणां हि सर्वेषामसम्भ(व ? वत्) भ्रमविप्रल-म्भत्वात् परस्परविरोधस्तत्त्वतो नास्तीति विरोधाभा(वे ? से)-ष्वीदृशः कल्पनीयोऽभिप्रायः । ननु देशकालनरान्तरेषु वर्णा-भासस्य बाधाभावात् कथं तद्रूपतया वाचः शृण्वन्न शृणोती-त्युच्यत इत्याशङ्क्य नरान्तरे बाधं दर्शयति—उतो त्वस्मै अप्यन्यस्मै व्याकरणसंस्कारपूर्वकयोगशोधितान्तःकरणाय तात्त्विकीं तनुमात्मीयां विसस्रे अपशब्दविपर्यासेन वर्णविप-र्यासेन च सञ्छन्नां तदुभयापनयेन (विरोधायते ?) प्रकाश-यते । यथा खल्वृतुस्नाता जाया प्राक्तनं रजोदूषितं वस-नमपास्य सुवासाः सती सम्भोगेच्छुः प्रणयप्रकर्षापनीय-मानत्रपा तस्मिन्नपि वाससि शनैः स्रंसमाने स्वां तनुमनवय-वेन परिणायकाय विवृणुते, तद्वदियं वाणी व्याकरणतीर्थस्ना-

नापनीतदुष्टशब्दाच्छादना प्रयोगनियमानुमन्यमानशोभन-वर्णवसना सती उशती प्रसीद(ति ? न्ती) योगाभ्यासरूपप्रण-यातिशयशिथिलीकृताज्ञानलज्जा वर्णाकारविपर्यासवसनेऽपि शनैः स्रंसमा(नैः ? ने) स्वां तनुमनवयवेन शाब्दिकपरिणाय-काय विवृणुत इत्युपमार्थः। विसस्र इति सर्तेर्णिचि 'रोदेर्णि-लुक् —' (उ० २. २४) 'बहुलमन्यत्रापि —' (उ० २. २५) इति णिलुकि 'न लुमता' — (१. १. ६३) इति वृद्धिनिषेधे 'छन्दसि लुङ्लङ्लिटः' (३. ४. ६) इति लिटि 'कास्प्रत्य-याद् —' (३. १. ३५) इत्यामोऽप्यमन्त्र इति निषेधे 'णि-चश्च' (१. ३. ७४) इत्यात्मनेपदे रूपम् । 'निगरणचलनार्थे-भ्यश्च' (३. १. ८७) इति परस्मैपदं न भवति, अत्र प्रकाशना-र्थत्वेन चलनार्थत्वाभावात् । तत्र पश्यन्नपि वाचमिति वाच-श्चक्षुर्विषयत्वोपदर्शनं परिदृश्यमानस्य पदार्थस्य वाग्विषयत्वे सति युज्यते । शृण्वन्नपि न शृणोतीति श्रवणाश्रवणे च सविपर्यासनिर्विपर्यासवागभिप्राये उपपद्येते । अन्यस्मै तनुं विवृणुत इत्येतदपि वर्णविपर्यासातीतवाक्तत्त्वाभिप्रायमेव स-म्भवति, वर्णरूपायास्तन्वाः सर्वान् प्रति विवृतत्वात् । अ-विद्वांसमाहार्धमिति पूर्वार्धं व्याचक्षाणानामर्थमात्रावेदनाद-श्र(णव ? वण)म् । संस्कारादिनिमित्तसमुदायार्थावेदनाददर्श-नम् । तदुभयवेदनाच्च तनुविसारणा इत्यभिप्राये कथ्यमा-नेऽर्थस्य वाक्च्छब्दाभिधेयत्वाभावान्मुख्यार्थहानिः । अथा-विद्वांसमर्धमिति समानाधिकरणे द्वितीयेऽर्धमिति चाविदुषो-ऽकथितकर्मत्वनिरासाय तत्रापि न ददर्श न शृणोतीत्येतस्मि-

नेवार्थे लौकिकमभिधानं, संस्कारविशिष्टवेदनाच्च तनुविसारणमित्यभिप्राये श्रुतशोरनतिरिक्तार्थत्वात् पुनरुक्तप्रायता। अतिरिक्तार्थत्वाय तु कश्चिच्छृण्वन्नपि शाब्दज्ञानवानपि फलतो न शृणोति, मननाभावात्। अपरस्तु पश्यन्नपि मननवानपि न पश्यति, निदिध्यासाभावात्। अन्यस्मै तु निदिध्यासते स्वां तनुं विवृणुत इत्याश्रीयमाणे श्रवणमननिदिध्यासनान्यपि वर्णातिरिक्तवाग्विषयाणीत्यस्माद्व्याख्यानादविशेष इति गतमेतत्॥

एवं मन्त्रवर्णानुसारेण वर्णातिरिक्तं वाक्तत्त्वं समर्थितम्। अधुना तु ब्राह्मणवर्णानुसारेण समर्थ्यते—"सैतं मन्त्रमपश्यत्। ते देवा एतद्यजुरपश्यन्। एतद्वै ब्राह्मणं पुरा वाजश्रवसा विदामक्रन्" इत्याम्नायमानं मन्त्रादिदर्शनमपि वर्णातिरिक्तवाक्तत्त्वविषयमेव न्याय्यम्। नहीदं दर्शनमुच्चरितशब्दश्रवणाभिप्रायम्, अस्मदादिभ्यो विशेषाभावप्रसङ्गात्। अनुच्चरितस्य च मन्त्रादेर्दर्शनं वर्णातिरिक्त(त्व) एव युज्यते। वर्णानतिरिक्तस्तु मन्त्रादिरुच्चारणव्यतिरेकेणात्मानमलभमानः स्वयमेवाविद्यमानत्वात् कथमतीन्द्रियदर्शिनापि दृश्येत। तथाहि—वर्णानामनित्यत्वे तावन्मन्त्रादेरुच्चारणाधीनात्मलाभत्वं व्यक्तमेव। नित्यत्वेऽपि न तेषामय(श्शा? श्शि)लाकल्पानां (न तेषां?) मन्त्रत्वम्, अपितु क्रमविशेषशालिनाम्। अ(ति?त्रि) क्रमस्योच्चारणाधीनत्वादुच्चारणनिबन्धन एव मन्त्रादिसद्भाव इत्यनुच्चारितस्याविद्यमानत्वादतीन्द्रियदर्शिनामपि द्रष्टुमशक्यता। वर्णातिरिक्तत्वे तु मन्त्रादितत्त्वस्योच्चारणव्यतिरेकेणापि विद्यमानत्वादतीन्द्रिय-

स्वादतीन्द्रियदर्शिनां तद्दर्शनमविरुद्धम् । न चातीन्द्रियदर्शिषु प्रमाणं नास्तीति वक्तव्यम्, अनुमायाः श्रुतिस्मृतिपुराणानां च तत्र प्रमाणत्वात् । अनुमा तावद् —विवादास्पदीभूतं कस्यचित् प्रत्यक्षं, वस्तुत्वात् करतलवदिति । न केषाञ्चिद् दर्शनायोग्यत्वे सर्वेषामयोग्यं, युष्मत्सुखादौ व्यभिचारात् । श्रुतिस्मृतिपुराणानि तु प्रसिद्धान्येव 'यः सर्वज्ञ' इत्यादीनि । नच तेषां विधिशेषतया स्वार्थप्रामाण्याभावः उपनिषत्सु विधिशेष(तयासि ? ताया असि)द्वत्वादितरत्र स्वार्थप्रतिपादनद्वारेण तच्छेषत्वात् । नह्युपनिषदामा(त्मा ?-त्म)ज्ञानविधिशेषता, ज्ञाते(याज्ञे ? ज्ञेये) चात्मनि तद्विशिष्टस्य ज्ञानस्य विधातुमशक्यत्वात्, कृ(त ? त्य)स्य चार्थित्वेनोपपत्तेः । नापि कर्मवि(धि)शेषता । अनारभ्याधीतस्य(स्य ?)पर्णमयीत्वादिवज्जुह्वादिस्थानीयकर्माव्यभिचारिद्वा(रे ?र)व्यतिरेकेण कर्मशेषत्वानुपपत्तेः । आत्मनश्च लोकवेदसाधारणतया जुह्वादिवि(धि ?)लक्षणस्य द्वारत्वायोगात् । परलोकफलेष्वेव कर्मसु देहव्यतिरेकेणास्यात्मन उपयोगात् तस्य चेह प्रतिपादनाज्जुह्वादिसाम्यमिति चेन्न । कर्मविरोध्यकर्तृत्वादिपरस्य तच्छेषत्वाघटनात् । अर्थवादादेव तर्हि कश्चिदपरो विधिः कल्पनीयः कार्यान्विते सर्वे(षां) शब्दानां शक्तिग्रहणात्, सिद्धवस्तुप्रतिपादने च पुरुषार्थाभावात् । तदप्यसत्, लिङादिशब्दानामन्यान्वितमात्रे शक्तिरिति कार्यद्वयव्यभिचारात् । 'ब्राह्मण! पुत्रस्ते जातः, कन्या ते गर्भिणी'त्यादौ च प्रकरणज्ञस्य विधिनिरपेक्ष-

सिद्धिना मुखविकासादिनापि व्युत्पत्तिदर्शनात् । 'आनन्दं ब्रह्मणो विद्वान् न बिभेति कुतश्चन' इति च सिद्धप्रतिपादनेऽपि पुरुषार्थसम्भवात् । तदेवमुपनिषत्सु विधिशेषत्वमसिद्धम् । विधिशेषाणामपि स्वार्थप्रतिपादनद्वारेण तच्छेषत्वं न वर्णवदनर्थकानामिति बाधकसाधकप्रमाणान्तराभावे स्वार्थे प्रामाण्यमास्थेयम् । यथोक्तं —

"विरोधे गुणवादः स्यादनुवादो विधीयते ।
भूतार्थवादशेषोऽपीत्यर्थवादस्त्रिधा मतः ॥"

इति । तदेवमनुमानागमाभ्यामतीन्द्रियदर्शिनामास्तित्वमवासितामिति 'सैतं मन्त्रमपश्यदि'त्यादिप्रतिपादितमप्यनुच्चारितमन्त्रादितत्त्वदर्शनं तदभिप्रायत्वेनाविरुद्धमिति गतमेतदपि । ब्रह्मयज्ञब्राह्मणेऽपि 'अजान् हे'त्यादिकाद् अपश्यन्नि'त्यन्ताद् वर्णातिरिक्तवाक्तत्त्वदर्शनं प्रतीयते । तत्राजानिति गर्गादिः । यज्ञो बहुषु लुरूपम् । पूर्वपुरुषाणां निर्देशस्तेषां गुर्वनुशिष्टत्वख्यापनाय । हेति प्रसिद्धपारम्पर्यद्योतनाय । पृश्नीनिति पृश्निनामकानित्यर्थः । शैली हीयं श्रुतेर्यदुत परकृतिरूपेण किञ्चिदुपदिदिक्षुरुपदेक्ष्यमाणस्यार्थस्यासम्प्रदायत्वसूचनाय सम्प्रदातारं स्वनाम्ना निर्दिशति, सम्प्रदायाविच्छेदसूचनाय च । तमपूर्वपुरुषेण देवभागो ह श्रौतष इतिवत् । न चानित्यसंयोगप्रसङ्गः, 'सूर्याचन्द्रमसौ धाता यथापूर्वमकल्पयदि'त्यादिश्रुत्यैव कल्पभेदेऽप्येकरूपसृष्ट्यभ्युपगमात् । अजानित्यस्याभ्यानर्षदित्यनेन सम्बन्धः । बहुवचन-

निर्देशस्तु

"एकस्य प्रतिभानं तु कृतकं न विशिष्यते"

इत्यस्य परिहाराय ।

नन्वस्मदादी(न्य?न)पि किमिति नाभ्यूषन्तीत्याशङ्क्यास्मदादिभ्यो विशेषं तेषां तपश्शुद्धान्तःकरणतया दर्शयितुमाह — तपस्यमानानिति । तच्च तप इह गुरुसकाशात् स्वीकृतस्य वेदस्याभ्यसनमेव । 'तपो हि स्वाध्याय' इत्यत्रैवाग्रे प्रतिपादयिष्यमाणत्वात् । अनेन चार्षस्याप्यागमतत्त्वसाक्षात्करणस्य गुरुमुखाधीतागमाभ्यसनात्मकतपःपूर्वकत्वप्रतिपादनान्नित्यागमानुग्रहरहितबुद्ध्यादिदर्शनस्य व्युदासः कृतो भवति । (आ)जानसिद्धानामपि वसिष्ठप्रभृतीनां प्राग्भवीयवेदाभ्यासपूर्वकत्वं द्रष्टव्यम् । तदुक्तम् —

"ऋषीणामपि यज्ज्ञानं तदप्यागमपूर्वकम्"

इति । ब्रह्मेति वेद उच्यते ब्रह्मयज्ञप्रकरणात् । तत्र हीदम्प्रथमतया प्रतीयमानं कृतकं स्यादित्याशङ्क्य प्रागेव बहुवचनेन तपस्यमानानित्यनेन च सूचितं तदनादित्वं महतापि कण्ठेनाह — स्वयम्भ्वाति । अभीत्याभिमुख्यविषयत्वात् साक्षाद्विषयत्वमाह । आनर्षत् आजगाम । प्रबभाविति यावत् ।

अथवायमृषतिर्गत्यर्थानां बुद्ध्यर्थत्वस्यापि दर्शनादिह ज्ञानमाह । ज्ञानेऽपि कर्मव्यापारमात्रमत्र भासनरूपं ब्रवीति *पच(तीति च पचि क्लृ?)क्लृप्तिरूपम् । तथाप्यत्र कर्मवद्भावो

* 'पचतिरिव विक्लित्तिरूपम्' इति पठनीयं भाति ।

न भवति । जानातेः कर्तृस्थभावकत्वेन प्रसिद्धत्वात् । ऋषतेश्च जानात्यर्थत्वात् । अतोऽभ्यानर्ष प्रतिबभासेत्यर्थः । पूर्वमागमेन प्रतिभासितः लक्षितः । इदानीं तु प्रतिभासनमेव श्रुत्युपात्तमिति व्याख्यानद्वये विशेषः । इदं च वेदसाक्षात्करणं वर्णादिरूपविपर्यासरहिताखण्डवेदतत्त्वाभिप्रायमेव युज्यते । वर्णात्मकवेदसाक्षात्करणं प्राकृतजनेऽप्यविशिष्टमिति तेन तेषामुत्कर्षासम्भवात् । नचेदं दार्ढ्यमात्राभिप्रायं, तत्राप्यनृषिसाधारणत्वाल्लक्षणाप्रसङ्गाच्च । आनर्षदित्यृषतेर्णलि द्वित्वेऽभ्यासस्य 'उरदि'त्यत्त्वे रपरत्वे हलादिशेषे 'अत आदे'रिति दीर्घत्वे 'तस्मान्नुड् द्विहल' इति द्विहल्छायानुकारिणोऽपि ग्रहणाद् द्विहल्ग्रहणप्रत्याख्यानाद् वा नुटि छान्दसे तुकि रूपम् । समाख्यानेनाप्यनुच्चरितनिर्विपर्यासशब्दतत्त्वदर्शनमृषीणामुपोद्बलयितुमाह—'तेऽजास्तत एव ऋषयोऽभवन्' । अद्याप्यृषय इति समाख्यायते ।

नन्वन्येऽप्यृषयः सन्तीत्यत आह — 'तद्दृषीणामृषित्वम्' । तदेव तादृशमेवानुच्चरितनिर्विपर्यासमन्त्रादितत्त्वदर्शनम् अन्येषामप्यृषिशब्दसमाख्यायमानानामृषित्वमृषिशब्दवाच्यत्वे प्रवृत्तिनिमित्तम् । अतोऽन्यत्रापि यत्र यत्रेयमृषिरिति समाख्या तत्र सर्वत्र तत एव समाख्यानात् तन्निमित्तभूतं वाक्तत्त्वदर्शनं वेदितव्यमित्यर्थः । ननु यद्यृषयः शब्दतत्त्वमतीन्द्रियं साक्षात्कुर्वन्ति तर्हि तदर्थमपि धर्मं साक्षात्कुर्युः । यथोक्तं —

'योऽप्यनुच्चरितं शब्दं गृह्णात्यर्थेऽस्य का कथा ।"

इति । ततस्तस्य सर्ववैदिकाभ्युपगतचोदनैकप्रमाणकत्वस्य व्याकोच इत्याशङ्क्य, सत्यं धर्ममपि साक्षात्कुर्वन्ति तथापि शब्दसाक्षात्करणपूर्वकं तत्सम्भेदवेदनीयस्य तदर्थस्य साक्षात्करणं नतु बुद्धादिदर्शनवत् स्वतन्त्रम् । स्वतन्त्रस्य च मानान्तरस्य चोदनैवेत्यवधारणेन व्यावृत्तिः, नतु तत्पूर्वकस्य, श्रुतार्थापत्तिवत् । अतो धर्मस्य साक्षात्क्रियमाणस्य शब्दसाक्षात्करणपूर्वकत्वाच्चोदनैकप्रमाणकताभ्युपेता विरुध्यत इत्यभिप्रेत्याह — तामित्यादि । तां स्वाध्यायाभ्यसनतपोबलसाक्षात्कृतां, यामृषयो मन्त्रकृतो मनीषिणोऽन्वैच्छन् देवास्तपसा श्रमेण । 'तां देवीं वाचं हविषा यजामह' इत्यादिश्रुत्युपवर्णितां वाग्देवतां त उपासाञ्चक्रिरे यज्ञसाक्षात्करणकामाः, तत्संभेदवेदनीयस्य यज्ञसाक्षात्करणस्य तत्पूर्वकत्वेनैवोपपत्तेः । यथोक्तं —

"सविकल्पेऽपि विज्ञाने शब्दः पूर्वं प्रतीयते ॥"

इति । अतोऽतीन्द्रियत्वाविशेषेऽपि वेदतत्त्वसाक्षात्करणपूर्वकमेव तदर्थसाक्षात्करणम् ।

अपिच अन्यत्र मन्त्रदर्शनसम्प्राप्तेऽप्यृषित्वे केषाञ्चित् तदर्थदर्शनासामर्थ्यं श्रुतिरेवाह — 'ऋषयो वा इन्द्रं प्र(त्य)क्षन्नापश्यंस्तं वसिष्ठः प्रत्यक्षमपश्यदि'ति । तथा निरुक्तकारोऽपि वेदसम्प्रदायौपयिकतया वेदसाक्षात्करणे वक्तव्ये किं पुनर्न्यायेन वेदसाक्षात्करणमप्युक्तं भवतीति मन्यमानस्तत्फलभूतधर्मसाक्षात्करणमेव महता कण्ठेनाह — 'साक्षात्कृतधर्माण ऋषयो बभूवुः । तेऽपरेभ्योऽसाक्षात्कृतधर्मभ्य उप-

देशेन मन्त्रान् सम्प्रादुरि'ति । धर्मसाक्षात्करणमात्रे ह्यस्यार्थे सत्युत्तरासङ्गतिः स्यात् । अतश्चोदनासाक्षात्करणपूर्वकत्वाद् धर्मसाक्षात्करणस्य न चोदनैकप्रमाणकत्वविरोध इत्याशयेनाह —'ते शब्दब्रह्मोपस्थिताः सन्तस्तत्प्रसादादेतं ब्रह्मयज्ञमपश्यन्नि'ति । श्रुतार्थापत्तिजनितानाम्नातवेदैकदेशदर्शननिमित्तेयमृषिशब्दप्रवृत्तिरिति । 'तस्माद्यदेव किञ्चानूचानोऽभ्यूहत्यार्षं तद् भवती'ति वचनादवगतमिति चेन्न । तस्य मनुष्यस्य मनुष्या वा ऋषिषूत्क्रामत्सु देवानब्रुवन् को न ऋषिर्भविष्यतीति तेभ्य एतं तर्कमृषिं प्रायच्छंस्त एतन्मन्त्रार्थचिन्ताव्यूहमप्यूहव्यौहन्निति' (?) प्रकृतेनैकवाक्यतया गौणार्थप्रतिपादनपरत्वावसायात् ।

अपिच मुख्यायामपि श्रुतार्थापत्तिकौशलमात्रनिमित्तायामृषिशब्दप्रवृत्तौ वर्णातिरिक्तं शब्दतत्त्वमवर्जनीयम् । तर्हि श्रुतानुपपत्त्या प्रमाणैकदेशभूतं पदमवान्तरवाक्यं वा कल्प्यम् । तस्य च क्रमवद्वर्णात्मकत्वे सत्युच्चारणाधीनानुपूर्वीकस्योच्चारणव्यतिरेकेणासत्त्वात् (?) कथमकल्पनम् । वक्तृबुद्ध्यधीनानुपूर्वीकस्यापि वक्तृविहीने वेदेऽनुपपत्तिरेव । श्रोतृबुद्ध्यधीनानुपूर्वीकस्य तु श्रुतार्थापत्त्यैव श्रोतृबुद्धेरुत्पाद्यमानत्वात् तत्प्रमेयानुपपत्तिरिति श्रुतार्थापत्तिप्रमेयस्यापि शब्दतत्त्वस्य वर्णातिरिक्तत्वं दुर्वारम् । अतः 'उतो त्वस्मै तन्व विसस्र' इति मन्त्रवर्णः 'स एतं मन्त्रमपश्यत्', 'ब्रह्म स्वयम्भ्वभ्यानर्षदि'त्यादिकश्च ब्राह्मणवर्णो वर्णातिरिक्तशब्दतत्त्वदर्शनमात्मदर्शनमुपदिशतीत्यागमसिद्धमप्यनंशं वाक्तत्त्वम् ।

एवं प्रत्यक्षादिमानत्र(य)सिद्धे शब्दस्य वर्णातिरिक्तत्वे तन्मयत्वं विश्वस्य शब्दाद्वैतप्रकरणे बहुभिर्हेतुभिः समर्थ्यत इति तदेव वास्य प्रकरणस्य प्रयोजनम् । इह तु तत्रान्वयादिति हेतुः प्रत्यक्षसमर्थनार्थो मनाग् विविच्यते दिङ्मात्रेण प्रयोजनं दर्शयितुम्। प्रत्यक्षेणैव हि शब्दान्वितं जगद् भाति, स्ववाचकसम्भिन्नसदाकारसम्भेदेनावसीयमानत्वात् । तथाहि — एक एव जगति सदाकार इति प्रतीतिसाक्षिकम्, अन्यथानन्त्यव्यभिचाराभ्यां सर्वत्र सद्रूपप्रख्योपाख्यानुपपत्तेः। तथा पदार्था अपि सर्वे ततः सद्रूपत्वात् तत्त्वाद् यदि भेदकलाया अपि निस्सरेम, तदा तावतांशेनासत्ताकालि(मया?म्ना) ग्रस्येमहीति तद्भयात् सदात्मनि सर्वात्मना निमग्नवपुष इत्येतदपि प्रत्यक्षसाक्षिकमेव । ननु भावानां परस्परव्यावृत्तिरपि प्रत्यक्षा। न व्यावृत्तिः प्रत्यक्षयितुं शक्या *'भावांशेनैव (हि?) सम्ब(न्धायोग?न्धो योग्य)त्वादिन्द्रियस्य ही'ति प्रतिपादितत्वात् । षष्ठप्रमाणेनापि व्यावृत्तिरुपनीता सत्युत्तरोत्तराभेदेन प्रत्यक्षप्रमाणोपनीतेन बाध्या। तथाहि—अवयवव्यावृत्तिरपि सामान्यधिया तद्व्यावृत्तिरप्युत्तरसामान्यधिया बाध्येति सत्तामात्रं प्रमाणतो(वि?ऽव)शिष्यते । तथावयवादीनामवय(वा?व्या)दिभ्यो (ना)त्यन्तभेदः, तथा प्रतिभासाभावात्। तथा भेदोऽपि न वस्तुमात्रम्, (अभाव?भावत्व)प्रसङ्गात् । नाप्यतिरिक्तः, अनवस्थापातात् । नाप्यतिरिक्तानतिरिक्ते, दोषद्वयापातात् विरोधाच्च । न च नास्ति, प्रतीयमानत्वात् । तदनिर्वाच्यत्वात् तादृशाविद्याविलसितत्वेन न सन्मात्रतां विहन्तीत्येक

* 'भावांशेनैव संयोगो योग्यत्वादिन्द्रियस्य हि' इति तु श्लोकवार्त्तिके।

एव तावज्जगति सदाकारः। अन्यथा कथमेकाकारे प्रख्योपाख्ये स्याताम्। उपाधितः स्त इति चेद्, उपाधिर्हि मानसम्बन्धो वा अर्थक्रिया वा सत्तासम्बन्धो वा। तत्र न तावन्मानसम्बन्धः। उपाधिना यावन्मानं तत्सम्बन्ध इति मेयस्य क्षणिकतापत्तेः। साधकमानविहीने च वस्तुनि सदसत्त्वसन्देहायोगात्। मानयोग्यता सत्तेति दोषद्वयनिरास इति चेद्, योग्यताप्येकानेका वा। अनेका चेदुपाधित्वायोगः। एकत्वेऽपि वस्तुनः स्वरूपं वा धर्मो वा। स्वरूपं चेदद्वैतमभ्युपेतं स्यात्। धर्मत्वेऽप्यैन्द्रि(यि)का वातीन्द्रि(यि)का वा शक्तिः। ऐन्द्रि(यि)का चेत् सत्तासामान्यमेव वागन्तरेणाङ्गीकृतं स्यात्। अतीन्द्रियशक्तिश्चेत् तस्याः कार्यानुमेयत्वात् सहसैव सन् घट इति प्रतिभासायोगः। तथा भूतभाविनोश्च सति मानयोग्यत्वे वर्तमानतापत्तिः। असति च मि(थ्य?त्य)नुपपत्तिः। अतो न मानसम्बन्ध उपाधिः। नाप्यर्थक्रिया। तत्राप्यर्थक्रियातः प्राक् सदिति प्रख्यानायोगात्। अर्थक्रियायाश्चार्थक्रियान्तरात् सत्तावगमेऽनवस्थापातात्। अनवगमे च प्रथमस्यैव तदुपाधिकसत्तावगमायोगात्। अतो नार्थक्रियाप्युपाधिः। नापि सत्तासम्बन्धः। इदं हि वैशेषिकाणां दर्शनम्। तेषां चाभावसप्तमाः षट् पदार्थाः। तत्रच सामान्यविशेषसमवायाः सत्तासम्बन्धविरहादसन्तः स्युः। सामान्यादयः स्वरूपसन्त इति चेद्, द्रव्यादयोऽपि तथा स्युः। आनन्त्यव्यभिचारौ चापरिहृतौ। विधिरूपप्रख्यासाधारण्यात् तत्परिहार इति चेत्, तत्रापि विधिरूपा वा प्रख्या विधिरूपस्य वेति विकल्प्यम्। प्रथमे कल्पे सप्तमपदार्थेऽपि प्रसङ्गः। द्वितीये

कल्पे तदपि विधिरूपमेकमनेकं वा । अनेकत्वे त्वानन्त्यादि । एकत्वेऽपि तद् धर्मिरूपं धर्मरूपं वा। धर्मिरूपत्वे सामान्यादिसङ्करः, तद्द्वारेण द्रव्यादिसङ्करश्चेत्यद्वैतापत्तिः । धर्मत्वे सत्तान्तरमेव तदित्यनवस्था । आश्रयसत्ता (ध)र्मादिषूपचर्यत इति चेत्, कार्यद्रव्याणां गुणानां कर्मणां च तथात्वापत्तेः ।

अपिच उपचरिता सत्ता न कार्याय पर्याप्नोति वह्निभाववत् । नह्युपचरितवह्निभावो माणवको दाहाय पाकाय वा कल्पते । अतः सामान्यादयः सत्तासम्बन्धविरहादसन्तः स्युः, तदन्तर्गता सत्ताप्येवमसती स्यादिति तत्सम्बन्धत्वेनाभिमतानि द्रव्यगुणकर्माण्यपि सद्रूपाणि न स्युः । भावरूपषट्पदार्थ्यभावे च तत्प्रतियोगिकमभावचतुष्टयमपि न स्यादिति सर्वशून्यतापत्तिः । तथा सत्तासम्बन्धोऽपि सतामसतां वा । सतां चेत् प्रागेव सन्त इति कथं सत्तासम्बन्धात् सन्तः । असतां चेत्, शशविषाणादीनामपि प्रसङ्गः । तथा सम्बन्धोऽपि सन्नसन् वा । संश्चेत्, तत्रापि सत्तासम्बन्धान्वेषणेऽनवस्था। असंश्चेत्, सम्बन्धिनोऽपि कथं ततः सन्तः स्युः । तथा सत्तापि सत्यसती वा । सती चेत्, सत्तान्तरान्वेषणेऽनवस्था । असती चेत्, कथं तत्सत्त्वादन्येऽपि सन्तः । अपिच सम्बन्धोऽपि सम्बन्धिभ्योऽन्योऽनन्यो वा । अनन्यश्चेन्नास्त्येवेति कथं ततोऽन्येऽपि सन्तः स्युः । अन्यश्चेत्, सम्बन्धो वा स्यादसम्बन्धो वा । आद्ये कल्पेऽनवस्था । द्वितीये तु सम्बन्धोऽन्योऽसम्बन्धश्चेति कथं सत्ताघटयोरेव नत्वश्वमहिषयोरपि । सम्बन्धस्य सम्बन्धान्तरा-

पेक्षा नास्तीति चेत्। किमुक्तं भवति। सम्बन्धपक्षाश्रयण-मसम्बन्धपक्षाश्रयणं तृतीयपक्षाश्रयणं वा। तत्र तृतीयः पक्षो नास्ति। इतरपक्षाश्रयणे चोक्तो दोषः। अतो न सत्तास-म्बन्धोऽप्युपाधिः।

यदपि च भाट्टैरुक्तम्—एकैव जगति सत्ता स्वरूप-सती। ततश्च भिन्नाभिन्नाश्चत्वारोऽपि द्रव्यगुणकर्मा-वान्तरसामान्याख्याः पदार्थास्तदभेदात् सन्तः, ततश्च पर-स्परतश्च भेदाद् विचित्रव्यवहारहेतवश्च। ज्ञेयता तु ज्ञान-सम्बन्धरूपा (ण्ये? न्यै) व भावाभावपक्षयुगलसाधारणीति। तदपि न। भेदाभेदविरोधस्योक्तत्वात्।

अपिच येनात्मना तेषामभिन्नत्वं, तेन तु सन्मात्रत्व-मेव, भिन्नेनाप्यात्मना सत्तानुग्रहाभावादसन्नाव एव भवेत्। तथाहि—सद्रूपाद् भेदेन प्रतीयमानोऽसन्नित्येव प्रतीये-तेति स्वप्रामाण्येनासत्त्वमावेदितं स्यात्। अभावचतुष्कमपि न सत्तामात्रप्रतियोगिकम्। अपितु तद्भेदभूतभावरूपपदार्थ-चतुष्कप्रतियोगिकमिति (तं? तत्)प्रत्यस्तमयेऽस्तमीयादेव।

अपिचेदमभावचतुष्कमपि तुच्छादव्यावृत्तं चेदप्र-ख्योपाख्यमेव स्यात्। व्यावृत्तं चेत् सत्तासम्भिन्नतया तन्मात्रमेवेति न भावचतुष्कादस्य विशेषः। अतः सिद्धम-द्वितीया सत्तैवानिर्वाच्यस्वशक्तिरूपवर्गद्वयवती व्यवहारपथ-मवतरतीति विश्वस्य परमार्थतः सत्तामात्रत्वम्। सा च सत्ता प्रकाशस्वरूपैव। अप्रकाशमानाया असदविशेषात्। प्रकाशमानायाश्च सर्वतोऽनवच्छिन्नतया स्वानिमित्तप्रका-

शैन प्रकाशमानत्वायोगात् । प्रकाशोऽपि सत्तास्वभाव एव, सर्वतोऽनवच्छिन्नत्वात् । अवच्छेदोऽप्यस(त्ता ? न्) । तदभावे सत्तास्वभावतैव युक्ता । अथहि प्रकाशस्यावच्छेदो भ(व ? वे)त् प्रकाशान्तरात् प्रकाशतया व्यावृत्तौ प्रतियोगिनोऽप्रकाशत्वप्रसङ्गात्, अप्रकाशतया प्रकाशैकस्वभावव्यावृत्त्यसम्भवात्, तृतीयप्रकारायोगाच्च । नाप्यप्रकाशात् । अप्रकाशाच्च व्यावृत्तिरप्रकाशमानाद्वा स्यात्, प्रकाशमानाद्वा स्यात् । न तावदप्रकाशमानाद्, अगृहीतप्रतियोगितायां व्यावृत्तेर्ग्रहीतुमशक्यत्वेनाप्रमाणत्वात् । प्रकाशमानश्च प्रकाशतामापन्न इति ततो व्यावृत्तिः प्रकाशान्तरव्यावृत्तिनिरासेन निरस्ता ।

नहि प्रकाशनसम्बन्धात् प्रकाशमानत्वम् अपितु प्रकाशस्वरूपत्वादेव । सम्बन्धस्य सम्बन्ध्यनतिरिक्तत्वे सत्यसत्तापातात्, अतिरिक्तत्वेऽप्यसम्बन्धत्वे सति तदीयत्वायोगात्, सम्बन्धत्वेऽप्यनवस्थापातात् । अतिरिक्तानतिरिक्ततायां च दोषद्वयापातात् विरोधाच्च ।

अपिच अप्रकाशः प्रकाशीभवन् प्राक्तनीमप्रकाशितां हित्वा वा प्रकाशी स्याद्, गृहीत्वा वा । न तावद्धित्वा, स्वरूपस्याहेयत्वात् । हानौ च स्वरूपवानपि हीयेतेति च्यर्थानुपपत्तेः । नापि गृहीत्वा, अप्रकाशतानुवृत्तौ तद्विपरीतप्रकाशरूपत्वायोगात् । अतोऽप्रकाशः प्रकाशीभवतीत्येतदपि दुर्घटम् । अतः प्रकाश एवानिर्वाच्यस्वशक्तिवशेन प्रकाशाप्रकाशद्वैराश्येन चकास्तीति सिद्धमनवच्छिन्नतया तस्य सत्ता-

स्वभावत्वम् । सत्तायाश्च प्रकाशमानायाः स्वातिरिक्तप्रकाशासम्भवात् प्रकाशस्वभावत्वम् ॥

इत्याचार्यश्रीभरतमिश्रकृतौ स्फोटसिद्धावागमपरिच्छेदः समाप्तः ॥

समाप्तं चेदं प्रकरणम् ।

शुभं भूयात् ।

APPENDIX A.

उद्धरणानुक्रमणी ।

पृष्ठम्.	ग्रन्थनाम.	कर्तृनाम.	उद्धरणानि.
१	...	...	तदागमे हि इश्यते
,,	...	औदुम्बरायणः	
,,	...	उपवर्षः	
,,	वाक्यपदीयम्	...	
६	...	...	अथैष विश्वज्योतिः, अनेन सहस्र-दक्षिणेन.
७	...	...	यो वा इमां पदशः.
,,	...	...	चत्वारि वाक्परिमिता पदानि.
८	...	...	नेति नेति.
१०	...	...	आशासाना मेधपतयः.
,,	...	....	शृणोत ग्रावाणः.
१२	मीमांसासूत्रम्	...	सामप्रदेशे विकारस्तदपेक्षः स्याच्छा-स्त्रकृतत्वात्.
,,	,,	...	वर्णे तु बादरिर्यथाद्रव्यं (द्रव्य)व्यति-रेकात्.
१३	...	...	वर्णस्फोटाविरुद्धैकार्थसमवायौ पद-स्फोटवाक्यस्फोटौ.
,,	...	...	वाक्ये न पदानि, पदे न वर्णाः, व-र्णेषु नैवावयवाः, तदवसायश्च नाद-क्रमनियमात्.
१५	...	...	तान्येव पदानि वाक्ये त एव वर्णाः पदेषु चेद् वर्णेषु वर्णभागानां पर-माणुवद् भेदः । तेषामव्यपदेश्य-त्वान्न वर्णो न पदम्.
१६	...	...	लौकिकं वापि यत् कर्म फले कालान्तरोद्गतौ । तत्रापि शक्तिरेवास्तु.

APPENDIX B.

ग्रन्थनाम.	कर्तृनाम.	सिद्धान्तः.	सिद्धान्तवाक्यानि.
(१) स्फोटसिद्धिः	मण्डनमिश्राचार्यः	पदस्फोटः	"निरस्तभेदं पदतत्त्वमेतद् व्यदर्शि युक्त्यागमसंश्रयेण।"
(२) स्फोटसिद्धिन्यायविचारः		,,	"गौरित्यादिषु विज्ञानमेकं पदमिति स्फुटम्।"
(३) स्फोटप्रतिष्ठा	केशवकविः	वाक्यस्फोटः	"तत्त्वतस्तु वाक्यमेवाखण्डं मयूराण्डकललवदविभागं भिन्नार्थप्रतीतिहेतुभूतं स्फोटाख्यमभ्युपगन्तव्यम्।"
(४) स्फोटतत्त्वम्	शेषकृष्णकविः	,,	". . . इत्यनवयवः प्रत्यस्तमितवर्णपदविभागो वाक्यस्फोट एव श्रेयानिति तत्त्वम्।"
(५) स्फोटचन्द्रिका	श्रीकृष्णभट्टः	,,	"तस्मादेकवर्णात्मकोऽखण्डवाक्यस्फोटो वाचक इति सिद्धम्।"
(६) स्फोटनिरूपणम्	आपदेवः	...	...
(७) स्फोटवादः	कुन्दभट्टः	...	...